जनवरी 2002 Rs. 10/-

संस्कृत

चन्दमामा

नववर्षस्य सुभाषया :


Are you a fan of Garuda, the masked hero with magical powers?
Enjoy the exciting exploits of Garuda!
Garuda
The Invincible
Don't miss the Garuda comics in Chandamama anymore!
Subscribe to Chandamama today!
Chandamama Annual Subscription within India Rs. 120/-
Send your remittances by DD or MO favouring CHANDAMAMA INDIA LIMITED, to
No. 82, Defence Officers Colony, Ekkatuthangal, Chennai - 600 097.
E-mail : subscription@chandamama.org



A
ACTIVE
B
BUZZ
BOSS
C
CADET DX
D
DEVIL DX
E
ELEPHANT
F
FISH
G
GIRAFFE
H
HEN
I
INSECT
J
JOKER
K
KIDD DX
L
LI'L ANGEL
LAMBADA
LIMBO
M
MISSILE
MISS INDIA Jr
N
NEST
O
ORANGE
P
PIRANHA
Q
QUEEN Jr
R
ROBO COP
S
SPARKY
SALSA
T
TERMINATOR
HERO CYCLES
V
W
The largest range of kids bikes
HERO CYCLES
THE ABC OF CYCLING

एतस्य अङ्कस्य विशेषाः

सम्पुटः - १८ जनवरी - २००२ सञ्चिका - १०

भारतगौरवगाथा

४७



विलक्षणं मौनम्
(वेतालकथा)

१९

यक्षपर्वतः

११

देवीभागवतम्

५१

अन्तरङ्गम्

★ समयस्य मूल्यम् ...७ ★ यक्षपर्वतः -११ ...११
★ कारागारम् एव प्रियम् ...१८ ★ विलक्षणं मौनम् (वेतालकथा) ...१९
★ विघ्नेश्वरः - १ ...२५ ★ वार्ताविशेषः ...३०
★ बुद्धिमान् बीरबलः ...३२ ★ तालप्रधानं नृत्यम् ...३४
★ मकरसङ्क्रान्तिः ...३६ ★ निर्धनस्य पाथेयस्य फलम् ...४०
★ भारतगौरवगाथा-२४ ... ४६
★ भारतम् अवगम्यताम् ...५०
★ देवीभागवतम् -४ ...५१ ★ उत्तमस्वप्नद्रष्टा ...५९
★ अजेयः गरुडः -१० ...६२
★ चित्रशीर्षिकास्पर्धा ...६६

SUBSCRIPTION

For USA and Canada
Single copy $2
Annual subscription $20
Remittances in favour of
Chandmama India Ltd.
to
Subscription Division
CHANDAMAMA INDIA LIMITED
No. 82, Defence Officers Colony
Ekkatuthangal, Chennai - 600 097
E-mail : subscription@chandamama.org

उपायनीक्रियताम्
वायुयानेन भारतेतरदेशान् प्रति
वार्षिकं (१२ सञ्चिकाः) - रू.९००/-
भारते रू. १२०/- (बुक्पोस्ट् द्वारा)
भवदीयं धनं D.D.द्वारा धनादेश(M.O.)द्वारा वा
'Chandamama India Limited'
नाम्ना प्रेषणीयम् ।

विज्ञापिकादानार्थं सम्पर्क्यताम् -
चेन्नै -
Ph - 044-2347384,
2347347399
e-mail : advertisements@
chandamama.org
देहली -
मोना भाटिया
Ph - 011-6515111/
6565513/6565516
मुम्बयी -
शकीलमुल्ला
Ph - 022-2661599/
2661946/2653057

© The stories, articles and designs contained in this issue are the exclusive property of the Publishers.
Copying or adapting them in any manner/medium will be dealt with according to law.

संस्थापकौ –
चक्रपाणिः नागिरेड्डी च

अधिकारचिन्तनात् पूर्वं कर्तव्यचिन्तनम्

द्व्यधिकद्विसहस्रतमवर्षस्य (२००२) आरम्भः अस्मान् ज्ञापयति यत् पञ्चाशतः वर्षेभ्यः पूर्वम् अस्माकं देशे प्रजाप्रभुत्वपद्धत्या निर्वाचितः जवहरलालनेहरुनायकत्वयुक्तः प्रथमः सर्वकारः संस्थापितः अभवत् इति । अस्मदीयस्य संविधानस्य आरचनं यदा अभवत् ततः वर्षद्वयानन्तरम् एतत् प्रवृत्तम् । १९५०तमवर्षस्य जनवरीमासस्य २६तमे दिनाङ्के भारतं गणराज्यत्वेन घोषितं जातम् । १९५१ तमवर्षस्य अक्टोबर्मासः, १९५२ तमवर्षस्य फेब्रवरीमासः इत्येतयोः अभ्यन्तरे देशस्य प्रथमं सार्वत्रिकमहानिर्वाचनं प्रवृत्तम् ।

देशस्य सार्वभौमत्वम्, ऐक्यं च सर्वेणापि जनेन रक्षणीयम् इति वदति संविधानम् । पालकानां यथा तथैव मातृभूमेः अपि रक्षणं सर्वेषां जनानाम् आद्यं कर्तव्यम् इति स्मारयति तत् ।

संविधानं नागरिकाणां कांश्चन अधिकारान् अपि प्रतिपादयति । अभिप्राय-प्रकटनस्वातन्त्र्यम् अभिमतमतानुसरणस्वातन्त्र्यं, वृत्तिस्वातन्त्र्यम् इत्यादीनि सर्वे जनाः अर्हन्ति एव । एवम् अधिकारान् निरूपयत् संविधानं प्रजानां कानिचन कर्तव्यानि अपि विधत्ते । महात्मा गान्धिः वदति यत् अधिकारापेक्षातः पूर्वं कर्तव्यपालनविषये विशेषावधानं दातव्यम् इति ।

अस्माकं देशः इदानीं विविधकोणेभ्यः सङ्कटसम्भावनाम् अनुभवति । अतः नववर्षारम्भावसरे सर्वैः अपि जनैः प्रतिज्ञातव्यं यत् मातृभूमेः सुरक्षायाः, बलसंवर्धनस्य, ऐक्यस्य च विषये मया कार्यं करिष्यते इति ।

सम्पादक : *विश्वम*

भारतनायकस्पर्धायां भागम् ऊढ्वा प्राप्नुवन्तु अपूर्वाणि पारितोषिकाणि

भारतीयाः नायकाः -४

आधुनिकभारते अपि विविधेषु क्षेत्रेषु अपूर्वतां प्रदर्शितवन्तः नायकाः सन्ति अनेके । तान् अधिकृत्य अत्रास्ति प्रश्नावली ।

समुचितोत्तरदातारः त्रयः पुरस्क्रियन्ते द्विचक्रिकादानेन

1 साहित्यक्षेत्रे नोबेल्प्रशस्तिं प्राप्तवत्सु एशियाखण्डे एव यः प्रथमः, यस्य च गीतानि स्वातन्त्र्यसङ्ग्रामयोद्धॄन् बहून् प्रैरयत् सः राष्ट्रनायकः कः ?

....

2 यदा भवन्तः पोखान्-अणुपरीक्षां स्मरन्ति तदा कस्य नाम आदौ स्मृतिपथम् आयाति ? सः 'भारतरत्न'प्रशस्तिविजेता सैन्यतन्त्रज्ञानसंशोधनक्षेत्रे अग्रगण्यः च । तस्य नाम किम् ?

....

3 वयं प्रतिवर्षं फेब्रवरीमासस्य २८तमे नोबल्-प्रशस्तिविजेतुः कस्यचित् संस्मरणार्थं 'राष्ट्रियविज्ञानदिनम्' आचरामः । सः भौतशास्त्रक्षेत्रे १९२८ तमे तां प्रशस्तिं प्राप्तवान् । तस्य नाम किम् ?

....

4 कः 'सितार'वाद्यवादकः इङ्ग्लेण्ड्देशस्य राज्ञ्याः हस्ततः 'नैट्हुड्'सम्माननं प्राप्तवान् इति किं जानान्ति भवन्तः ?

....

5 यः दूरदर्शनक्रीडाप्रदर्शने भागं वहन् अतिजनप्रियः अस्ति, यश्च कोटिशः जनानां हृदयसम्राट् अस्ति, यस्य च निमित्तं कोल्कतानगरे देवालयः एव निर्मितः अस्ति, सः कः?..............................

प्रतिप्रश्नम् उत्तरं लिखन्तु । एतेषु पञ्चसु नायकेषु प्रियतमः कः किमर्थं च इति दशभिः शब्दैः लिखन्तु । मम प्रियतमः नायकः ....

....

....

....

भागग्रहीतुः नाम ....

वयः .... कक्ष्या ....

सङ्केतः ....

....

....

पिन् .... दूरवाणी ....

एतं पुटं पृथक्कृत्य प्रेषयन्तु अधोनिर्दिष्टसङ्केताय -

भारतनायकस्पर्धा-५
चन्दमामा इण्डिया लिमिटेड्,
८२, डिफेन्स् आफीसर्स् कालोनी
एक्काटुतङ्गल्, **चेन्नै - ६०० ०९७**
उत्तरप्रेषणाय अन्तिमदिनाङ्कः - **५ जनवरी - २००२**

नियमाः -

१. अधिकाधि- ऊनचतुर्दशवर्षीयाः एतस्यां स्पर्धायां भागं ग्रहीतुम् अर्हन्ति ।
२. विविधभाषाभिः प्रेषितानि उत्तराणि परिशील्य त्रयः श्रेष्ठाः चीयन्ते । यदि योग्योत्तरदातारः बहवः तर्हि प्रियतमनायकविषये लिखितं वाक्यम् अवलम्ब्य चयनं क्रियते ।
३. निर्णायकानां निर्णयः एव अन्तिमः ।
४. एतं विषयम् अधिकृत्य पत्रव्यवहारः कोऽपि न करणीयः ।
५. विजेतारः पत्रद्वारा सूच्यन्ते ।

भवद्भ्यः पारितोषिकं ददाति

HERO CYCLES



समयस्य मूल्यम्

दीक्षितः प्रसिद्धः कश्चन वैद्यः । सः चिकित्सायां विशेषसामर्थ्यवान् । तदीया बुद्धिमत्ता अपि अधिका ।

कदाचित् कमलगुप्तः नाम कश्चन वणिक् तं द्रष्टुम् आगतवान् । तं दृष्ट्वा वैद्यः - ''आगच्छतु गुप्तवर्य ! क्षणं प्रतीक्षताम्'' इति उक्त्वा औषधादिकं कपाटिकायां स्थापितवान् ।

तस्मिन् एव समये कश्चन भिक्षुकः उच्चस्वरेण अवदत् - ''भिक्षुकोऽस्मि श्रीमन् । अहं पङ्गुः अन्धोऽपि । अतः चलितुं द्रष्टुं वा न शक्नोमि । कृपया भिक्षां ददातु'' इति ।

दीक्षितः तम् अवदत् - ''किमपि न दीयते । अग्रे गच्छतु'' इति । भिक्षुकः निराशतया अग्रे गतवान् ।

कमलगुप्तः किमपि वक्तुम् उद्युक्तः । किन्तु तावता अपरः भिक्षुकः द्वारे स्थित्वा उच्चस्वरेण - ''श्रीमन् ! वृद्धोऽस्मि । किमपि कार्यं कर्तुं शरीरे शक्तिः नास्ति । किमपि ददातु कृपया, येन पुण्यं प्राप्येत'' इति अयाचत ।

दीक्षितः एतदवसरे अपि - ''किमपि न दीयते । गच्छतु रे'' इति उक्त्वा तं वृद्ध-भिक्षुकं प्रेषितवान् ।

कमलगुप्तः दीक्षितम् उद्दिश्य - ''मम आगमनस्य कारणं तु .... '' इति यावत् उक्तवान् तावता द्वारसमीपे महाढक्कानादः श्रुतः ।

कश्चन बलवान् पुरुषः शरीरं वर्णेन लिप्त्वा कशया शरीरं ताडयन् आसीत् तत्र । तेन सह आगता महिला महाढक्कां वादयति स्म उच्चैः ।

तौ दृष्ट्वा दीक्षितः झटिति बहिः गत्वा एकं रूप्यकं तस्यै महिलायै दत्तवान् । तौ ततः निर्गतवन्तौ ।

तदनन्तरं दीक्षितः प्रत्यागत्य स्वस्य आसन्दे उपविश्य कमलगुप्तम् अवदत् - ''गुप्तवर्य !

वदतु, केन वा उद्देशेन आगतं भवता ?'' इति ।

''मम कश्चन लघुः सन्देहः अस्ति'' इति अवदत् कमलगुप्तः ।

''सन्देहः लघुः महान् वा भवति चेदपि तस्य बाधा तु समाना एव । वदतु, कः सन्देहः भवन्तं बाधते ?'' इति अपृच्छत् दीक्षितः ।

''आदौ यौ भिक्षुकौ आगतौ तयोः कृते किमपि न दत्तं भवता । किन्तु अनन्तरकाले आगतायै महाढक्कावादिकायै रूप्यकं दत्तम् । आदौ आगतयोः एकः पङ्गुः अन्धः च आसीत्, अपरः वृद्धः आसीत् । उभौ अपि भिक्षादानाय अर्हौ आस्ताम् । अनन्तरम् आगतौ तु दृढकायौ, शारीरकश्रमकरणे समर्थौ च । तथापि तयोः कृते भवता एकं रूप्यकं दत्तम् । पात्रे अदानम् अपात्रे दानं च कृतं भवता । एतत् किम् उचितम् ? एवं किमर्थं कृतं भवता ? एषः एव मम सन्देहः'' इति अवदत् कमलगुप्तः ।

''योग्यः प्रश्नः भवतः । वस्तुतः भिक्षादानस्य एव विरोधी अहम् । मया भिक्षा न दत्ता एव । मया महाढक्कावादकयोः कृते यत् दत्तं तत् न भिक्षारूपेण, अपि तु अन्येन उद्देशेन'' इति मन्दहासपूर्वकम् अवदत् दीक्षितः ।

''भवतः उद्देशः कः आसीत् श्रीमन् ?'' इति महता कुतूहलेन दीक्षितं पृष्टवान् कमलगुप्तः ।

''अनन्तरं यौ आगतौ तौ भिक्षार्थम् अनर्हौ

इति अहम् अपि जानामि । यदि तयोः कृते मया किमपि न दीयेत तर्हि तौ कशाताडन-ढक्कावादनादिभिः निरन्तरं कोलाहलम् अकरिष्यताम् । अदानस्य निमित्तम् अवाच्य-शब्दैः मम निन्दनम् अपि अकरिष्यताम् । एतत्सर्वम् अहं न इच्छामि स्म । अतः तयोः दर्शनसमनन्तरम् एव मया धनं दत्तम् । धनं प्राप्य तौ कोलाहलं विना निर्गतौ । एतेन मया पञ्चदशनिमेषात्मकस्य समयस्य सञ्चयः कृतः । मम मनसः शान्तिः अपि रक्षिता'' इति अवदत् दीक्षितः ।

कमलगुप्तः क्षणकालं विचिन्त्य स्वकोषतः एकं रूप्यकं निष्कास्य वैद्याय यच्छन् - ''वैद्यवर्य ! मम प्रश्नस्य उत्तरस्य दानार्थं भवता पञ्चदश निमेषाः व्ययिताः । स च समयः मूल्यवान् अपि । अतः एतत् रूप्यकं स्वीकरोतु'' इति अवदत् ।

दीक्षितः तस्य रूप्यकस्य स्वीकरणं निराकुर्वन् - ''गुप्तवर्य ! भवता मम आशयः स्पष्टतया न गृहीतः । मया क्रीतः आसीत् भिक्षुकस्य समयः । भिक्षुकस्य योग्यतायाः अनुगुणं मया एकं रूप्यकं दत्तम् । किन्तु भवान् क्रेतुम् इच्छति वैद्यस्य मम समयम् । स च अमूल्यः । अतः एकरूप्यकदानेन क्रेतुं योग्यः न सः । तस्य समयस्य किं मूल्यं भवता दातव्यम् इति भवतः आगमनोद्देशस्य कथनस्य अनन्तरम् अहं निर्णेष्यामि । भवान् कस्य कार्यस्य निमित्तम् आगतः इति आदौ वदतु'' इति अवदत् ।

तदा कमलगुप्तः शिरः हस्तेन स्पृशन् चिन्तनम् आरब्धवान् । वस्तुतः केन उद्देशेन अत्र आगतम् इति सर्वथा विस्मृतम् आसीत् तेन ।

तस्य स्थितिं दृष्ट्वा हसन् दीक्षितः अपृच्छत् - ''भवान् आगतः अस्ति विस्मरण-शीलतायाः निमित्तम् औषधं किम् इति प्रष्टुम् । एवं ननु ?'' इति ।

''आम् आम् । तदर्थम् एव आगतं मया । एषु दिनेषु महती विस्मरणशीलता मम । किमपि स्मृतिपथे न तिष्ठति एव'' इति अवदत् कमलगुप्तः ।

''एतदर्थं दीर्घकालिकचिकित्सा एव करणीया भविष्यति । व्ययः अपि महान् स्यात् एव'' इति हसन् उक्तवान् दीक्षितः ।



ORISSA
The soul of India

अत्रास्ति प्रश्नावली !!

कटकः

सहस्राधिकवर्षेभ्यः पूर्वं निर्मिते नगरे सञ्चारः कस्य वा मोदाय न भवेत् ? ओरिस्साराज्यस्य कटकनगरं स्वस्य सहस्रतमं वर्षं दृष्टवत् अस्ति । एतत् नगरं सदा प्रवासिनां, वणिजां, लघुप्रवासेच्छुकानां, परिसरप्रियाणां च सन्तोषस्य जनने नितरां समर्थम् अस्ति ।

पर्वतप्रस्थभूमिः, वलयः इत्यादयः 'कटक'-पदस्य अर्थाः । उत्कलराजधानी इत्यपि अर्थः अस्ति तस्य । किन्तु इदानीं राजधानीत्वं एतस्य नगरस्य नास्ति चेदपि ओरिस्साराज्ये एतस्य प्रामुख्यं तु न अपगतम् । बहवः राजवंशीयाः एतत् नगरं केन्द्रीकृत्य राज्यशासनं कृतवन्तः । गङ्गवंशीयैः निर्मापितस्य बारामतीदुर्गस्यावशेषाः इतिहासकारान् पुरातत्त्वावेतॄन् च आकर्षन्ति ।

दैवभक्तानां तृप्तिजनकानि स्थानानि अत्र सन्ति बहूनि । विविधदेवानां मन्दिराणि विराजन्ते अत्र । 'काडुम्-ऐ-सुल्'नामकं स्थानं तु हिन्दुभिः मुस्लिमैः चापि पवित्रतमत्वेन भाव्यते । देवदूतस्य मोहम्मदस्य पादचिह्नेन युक्ता शिला अत्र अस्ति इति जनैः भाव्यते ।

परिसरप्रियाणां चित्तम् आकर्षति 'अनसुपा'-सरोवरम् । अत्र शैत्यकाले विविधदेशेभ्यः अपूर्वाः पक्षिणः आयान्ति स्वसन्तानवृद्ध्यर्थम् ।

पर्वतारोहणप्रियान् साहसयात्राप्रियान् च आनन्दयति अशोकझार् । महानद्याः मध्ये स्थितः धवलेश्वरद्वीपः दिनं यावत् विहारार्थं समुचितं स्थलम् ।

कटकनगरे हस्तकौशलनिर्मितवस्तूनि, रमणीयशिल्पचित्रयुक्तानि ताम्रकांस्यादिपात्राणि, कौशेयकार्पासवस्त्राणि इत्यादीनि निर्मीयन्ते ।

प्रश्नोत्तरस्पर्धा भवदर्थम् !

ऊनचतुर्दशवर्षीयाः अत्र भागं बोद्धुम् अर्हाः !!

प्रश्नावली - 5

१. पुरीनगरस्य रघुराजपुरे विशिष्टं चित्रनिर्माणं प्रचलति । सः चित्रनिर्माणक्रमः कः ?

....

२. 'स्टील्'निर्माणं विशेषतः ओरिस्साराज्यस्य कस्मिन् नगरे प्रचलति ?

....

३. ओरिस्साराज्ये कुत्र उषाकोटि-वन्यपशुधाम अस्ति ?

....

भवताम् उत्तराणि रिक्ते स्थले लिखित्वा नामसङ्केतादिभिः अधस्तनं विवरणपत्रं प्रपूर्य अधोनिर्दिष्टसङ्केताय प्रेषयन्तु -

Orissa Tourism Quiz Contest
Chandamama India Limited
No.82, Defence Officers Colony
Ekkatuthangal, Chennai - 600 097

नाम - ....

वयः - ....

सङ्केतः - ....

....

Pin : .... Phone ....

Winners picked by Orissa Tourism in each contest will be eligible for **3 days, 2-night** stay at any of the **OTDC Panthanivas**, upto a maximum of four members of a family. Only original forms will be entertained. The competition is not open to CIL and Orissa Tourism family members. Orissa Tourism, Paryatan Bhaven, Bhubaneswar-751 014. Ph: (0674)432177, Fax:(0674)430887, e-mail:ortour@sancharnet.in. Website:Orissa-tourism.com

यक्षपर्वतः

११

(अरण्यदुर्गे वीरपुरीयसैनिकाः स्वर्णाचार्यं पराजितवन्तः । तदा स्वर्णाचार्यः अनुचरैः सह अरण्ये पलायितवान् । तत्र तेन खड्गवर्मा, जीवदत्तः, समरबाहुः च दृष्टाः । भल्लूकगुरुः स्वशिष्याणां गुरुभक्तिं प्रमाणीकर्तुम् इच्छन् कञ्चित् आज्ञापितवान् यत् वृक्षाग्रात् उत्पततु इति । तत्समनन्तरम् एव कश्चन भल्लूकचर्मधारी भटः वृक्षम् आरुह्य उन्नतशाखातः उत्पतितवान् । तदनन्तरम् ......)

वृक्षात् उत्पतनाय उद्युक्तं भल्लूकचर्मधारिणं भटं दृष्ट्वा जीवदत्तः धावन् गत्वा स्वस्य मान्त्रिकदण्डम् अग्रे प्रसारितवान् । भल्लूकचर्मधारी गुरोः स्मरणं कुर्वन् वेगेन तस्य दण्डस्य उपरि पतितवान् । तस्य कोऽपि व्रणः यथा न भवेत् तथा तं गृहीत्वा भूमौ स्थापितवान् जीवदत्तः ।

गुरुभक्तिप्रदर्शनार्थं प्राप्तः अवकाशः नष्टः इत्यतः नितरां खिन्नः अभवत् भल्लूकचर्मधारी भटः ।

सः खेदमिश्रितस्वरेण अवदत् – ''श्रीमन् ! भवान् मां रक्षितवान् । किन्तु स्वर्गप्राप्त्यर्थं स्थितम् अवकाशं नाशितवान्'' इति ।

तत् श्रुत्वा जीवदत्तः हसन् उक्तवान् – ''मरणानन्तरं स्वर्गः प्राप्यते उत नरकम् इति तु न ज्ञायते । प्राणापायस्तु निवारितः अभवत् एतावता । भवता भवद्गुरुणा च समरबाहोः साहाय्यं करणीयम् अस्ति । प्राणत्यागार्थं नायं समयः'' इति ।

तावता भल्लूकगुरुः समरबाहुः खड्गवर्मा च तत्र आगतवन्तः । भल्लूकगुरुः नितरां सन्तुष्टः आसीत् । सः जीवदत्तं खड्गवर्माणं च अवदत् –''अयि भोः, मम शिष्याणां गुरुभक्तिः कियती इति भवद्भ्यां प्रत्यक्षं दृष्टं

खलु ?'' इति ।

''भवच्छिष्याणां गुरुभक्तिः सुदृढा इति अङ्गीक्रियते मया । एतस्मै एतत्सहकारिणे अन्यस्मै च मया एकं कार्यं दीयते । तत् यशस्वितया करणीयं ताभ्याम्'' इति उक्तवान् जीवदत्तः ।

भल्लूकगुरुः अपरं शिष्यं स्वसमीपम् आहूतवान् । तौ उक्तवान् जीवदत्तः - ''वीरपुरीयाः सैनिकाः अनतिदूरे एव कुत्रापि स्युः । आकस्मिकतया इव भवद्भ्यां तेषां समीपं गन्तव्यम् । समरबाहु प्रभृतयः भवतोः गुरोः बिलदुर्गे सन्ति इति भावः तेषु उत्पादनीयः । एतत् कर्तुं शक्नुतः खलु भवन्तौ ?'' इति ।

''एतत् राज्ञः यथा तथैव अस्माकं गुरोः अपि कार्यम् । अतः श्रद्धया एतत् करिष्यावः । यशस्विनौ च भविष्यावः'' इति उक्तवन्तौ तौ भल्लूकचर्मधारिणौ ।

तदनन्तरं तौ ततः निर्गतौ । बहुकालं यावत् अरण्ये अटितं ताभ्याम् । सूर्यास्तसमयः यदा आसन्नः तदा कस्यचित् वृक्षस्य अधः केचन अश्वारोहिणः दृष्टाः ।

तान् दृष्ट्वा भल्लूकचर्मधारिणौ अपरस्यां दिशि मुखं कृत्वा उच्चस्वरेण उक्तवन्तौ - ''गुरुवर्य ! कुत्रास्ति भवान् ? वयम् अत्र स्मः'' इति । एवं पञ्चषवारं ताभ्याम् उच्चस्वरेण उक्तम् ।

तयोः कोलाहलं श्रुत्वा वीरपुरीयसैनिकाः आश्चर्यचकिताः । तेषां गणस्य नायकः झटिति कोषात् खड्गम् आकृष्य अनुचरान् उद्दिश्य -''एतौ कोलाहलकर्तारौ कौ स्याताम् ? भल्लूकचर्म वेषत्वेन धृतम् अस्ति एताभ्याम् । प्रायः एतौ अस्माकम् अपायं कर्तुम् अपि अर्हन्ति । एतौ बध्नीयाम तावत्'' इति उक्त्वा भल्लूकचर्मधारिणोः दिशि वेगेन गतवान् ।

तान् दृष्ट्वा भल्लूकचर्मधारिणौ भीतिं प्रदर्शयन्तौ शूलं भूमौ स्थापयित्वा करौ उन्नीय -''मान्याः, क्षन्तव्यौ आवाम् । आवां पराजयम् अङ्गीकुर्वः । अस्माकं गुरुः शत्रुभिः गृहीतः इति भाति । एवं स्थिते किम् आवयोः जीवनेन ?'' इति उक्तवन्तौ ।

तदा आश्चर्यं प्रकटयन् दलनायकः पृष्टवान् - ''भवतोः गुरुः शत्रुभिः गृहीतः किम् ? ते शत्रवः के ?'' इति ।

तदा कश्चन भल्लूकचर्मधारी उक्तवान् - ''महाशय ! अद्य प्रातः केचन उष्ट्रवाहनाः

अकस्मात् अस्माकं बिलदुर्गं प्रविष्टवन्तः । तत्समये वयं सर्वे देवीपूजायां मग्नाः आस्म इत्यतः तान् प्रतिरोद्धुं न शक्तवन्तः । ते अस्मासु बहून् मारितवन्तः । अस्माकं गुरुः, केचन वयं शिष्याः च कथञ्चित् आत्मानं रक्षन्तः अरण्यम् आगताः'' इति ।

दलनायकः स्वस्य कांश्चन अनुचरान् उद्दिश्य - ''भवन्तः वेगेन सेनाध्यक्षसमीपं गत्वा वदन्तु यत् शत्रवः बिलदुर्गे निलीय स्थितवन्तः सन्ति इति'' इति आदिश्य भल्लूकचर्मधारिणौ उद्दिश्य - ''शत्रवः कुत्र सन्ति इति वदद्भ्यां भवद्भ्यां महान् उपकारः कृतः। सेनाध्यक्षः यदा आगमिष्यति तदा तम् उक्त्वा अहं पारितोषिकं दापयिष्यामि'' इति अवदत् ।



तदा अपरः भल्लूकचर्मधारी अनिच्छा-पूर्वकम् अवदत् - ''वयं तु देव्याः उपासकाः । पारितोषिकादिषु अस्माकम् आस्था नास्ति । गुरुसमीपं वयं गच्छामः इदानीम्'' इति ।

तदा दलनायकः अवदत् - ''अये, तिष्ठतु । बिलदुर्गं प्रति गमनाय मार्गः दर्शनीयः भवद्भ्याम् । अतः एतस्य वृक्षस्य अधः किञ्चित्कालं तिष्ठताम्'' इति ।

दलनायकेन प्रेषिताः सैनिकाः सेनाध्यक्षं वार्तां श्रावितवन्तः । सेनाध्यक्षः महता सन्तोषेण - ''ते राजद्रोहिणः सर्वे एकत्र एव सन्ति इति एतस्मात् सिद्धम्'' इति वदन् अश्वारोहिभिः पदातिभिः च सह दलनायकसमीपम् आगत-वान् ।

दलनायकः सेनाध्यक्षं पूर्णं विवरणम् उक्तवान् । सेनाध्यक्षः आज्ञापितवान् यत् सर्वे बिलदुर्गं प्रति गच्छेयुः इति । भल्लूकचर्म-धारिणौ अग्रे प्रस्थितवन्तौ । अन्ये सर्वे तौ अनुसृतवन्तः । पञ्चदशनिमेषाभ्यन्तरे सर्वे बिलदुर्गसमीपे उपस्थिताः ।

सेनाध्यक्षः अश्वात् अवतीर्य बिलदुर्गस्य द्वारे स्थित्वा उच्चस्वरेण - ''अहं वीरपुरस्य सेनाध्यक्षः महत्या सेनया सह उपस्थितः अस्मि । भवन्तः सर्वे आयुधानि भूमौ स्थापयन्तः शरणम् आगच्छेयुः । द्वित्र-निमेषाभ्यन्तरे भवन्तः शरणागतिं न अङ्गी-कुर्वन्ति चेत् अहम् एव सेनया सह अन्तः आगत्य भवतः सर्वान् यमपुरीं प्रेषयिष्यामि'' इति अवदत् ।

पञ्चदश निमेषाः अतीताः चेदपि गुहातः कोऽपि बहिः न आगतः । एतस्मात् सेनाध्यक्षः नितरां कुपितः । सः अश्वारोहिणः सूचितवान्

यत् भवन्तः अश्वान् वृक्षे बद्ध्वा मत्समीपे उपस्थिताः भवन्तु इति । ते सर्वे तथैव कृतवन्तः ।

ततः ते सर्वे सम्भूय गुहां प्रविष्टवन्तः । उभौ भल्लूकचर्मधारिणौ तेषां मार्गदर्शकौ आस्ताम् ।

यदा ते सर्वे अन्तः गताः तदा चत्वारः भल्लूकचर्मधारिणः अश्वरक्षकौ उभौ भटौ झटिति आक्रम्य बद्धवन्तः । तयोः हस्तपादं रज्ज्वा बद्ध्वा मुखं वस्त्रेण प्रपूर्य तौ कण्टकमये गुल्मे क्षिप्तवन्तः ।

तावता जीवदत्तः, खड्गवर्मा, भल्लूकगुरुः, समरबाहुः च तत्र उपस्थिताः ।

जीवदत्तः भल्लूकगुरुम् अवदत् - ''वीरपुरस्य सेनाध्यक्षः सजीवं ग्रहीतव्यः अस्माभिः । सः सैन्येन सह गुहायाः अन्तः अस्ति । तस्मिन् भीतिम् उत्पादयितुं महाद्वारे शुष्ककाष्ठानि राशीकृत्य ज्वालनीयानि । धूमः अन्तः प्रसरेत् । एतत्कार्यं भवतः शिष्याः, समरबाहोः अनुचराः च कुर्युः अविलम्बेन'' इति ।

भल्लूकगुरोः आज्ञानुसारं भल्लूकचर्मधारिणः शुष्कानि काष्ठपर्णादीनि राशीकृतवन्तः । ततः तैः काष्ठपर्णादिषु अग्निः योजितः ।

जीवदत्तः गुहायाः अन्तः पश्यन् अवदत् - ''अये वीरपुरीयसेनाध्यक्ष ! भवान् ससैन्यः आयुधानि पातयित्वा निमेषत्रयाभ्यन्तरे बहिः आगच्छेत् । अन्यथा वयम् अग्निज्वालनेन भवतः सर्वान् दग्धान् करिष्यामः'' इति ।

शत्रूणाम् अन्वेषणे मग्नेन सेनाध्यक्षेण एतत् वचनं श्रुतम् । तेन गुहायाः प्रकोष्ठेषु महता अन्वेषणेनापि कोऽपि न दृष्टः। 'अहं वञ्चितः अभवम्' इति अवगतं तेन ।

किं करणीयम् इति तेन क्षणकालं यावत् चिन्तितम् । तावता धूमप्रसारः प्रवृद्धः ।

अग्नियुक्तानि काष्ठानि कानिचन तत्समीपे अपि पतितानि । महती विपत् उपस्थिता इति तेन झटिति अवगतम् । अतः सः स्वस्य हस्तस्थम् आयुधं भूमौ पातयित्वा सर्वान् सैनिकान् आदिष्टवान् यत् सर्वे आयुधानि भूमौ स्थापयेयुः इति ।

यदा सर्वैः सैनिकैः तथैव कृतं तदा सः उच्चस्वरेण अवदत् - ''अहं वीरपुरीयः सेनाध्यक्षः ससैन्यं शरणागतः अस्मि । निरायुधाः सन्तः वयं गुहातः बहिः आगच्छन्तः स्मः'' इति ।

खड्गवर्मा यावत् किमपि वक्तुम् उद्युक्तः तावता भल्लूकगुरुः अवदत् - ''आर्य ! राजा तत्पक्षीयाः च विश्वासार्हाः न भवन्ति प्रायः । अतः आदौ मच्छिष्यौ प्रेषयितुं सूचयाम । तयोः मुखात् वस्तुस्थितिं ज्ञात्वा अग्रिमं पदं निर्णयाम'' इति ।

एतत् श्रुत्वा जीवदत्तः हसन् अवदत् - ''भुजङ्गः एव अपरस्य भुजङ्गस्य गतिम् अवगन्तुं शक्नोति । अतः एतेन यथा उच्यते तथैव भवतु । आदौ भल्लूकचर्मधारिणौ बहिः प्रेषयन्तु इति सूचयाम'' इति ।

ततः भल्लूकगुरुः शूलम् उन्नीय - ''वृकेश्वरीमाता जयतात्'' इति घोषयित्वा उच्चस्वरेण अवदत् - ''शिष्यौ, आदौ भवन्तौ बहिः आगच्छताम् । अन्ये सर्वे तत्रैव भवन्तु । तिलमात्रम् अपि अग्रे न आगच्छेयुः ते । एषा अरण्यदुर्गमहाराजस्य समरबाहोः आज्ञा'' इति अघोषयत् ।

एताम् आज्ञां श्रुत्वा तौ उभौ भल्लूक-चर्मधारिणौ गुहातः बहिः आगतौ ।

गुहायाः अन्तः स्थितः सेनाध्यक्षः स्वस्य असहायकताविषये नितरां प्रक्षुब्धः आसीत् । सः भीत्या कम्पते स्म अपि ।

गुहातः बहिः आगतौ भल्लूकचर्मधारिणौ समग्रं विवरणं श्रावितवन्तौ । ततः खड्गवर्मा जीवदत्तः च सेनाध्यक्षम् आज्ञापितवन्तौ - ''ससैन्यं गुहातः बहिः आगन्तुम् अर्हति भवान्'' इति ।

बहिः आगतः सेनाध्यक्षः खड्गवर्मजीवदत्तौ नमस्कर्तुम् उद्युक्तः । तदा जीवदत्तः समरबाहुं प्रदर्शयन् अवदत् - ''एतस्य प्रदेशस्य राजा एषः । एषः चन्द्रवंशजः । भवता एषः शरणं गन्तव्यः'' इति ।

वीरपुरीयः सेनाध्यक्षः शिरः अवनमय्य समारबाहुं नमस्कृतवान् । तावता सर्वे सैनिकाः गुहातः बहिः आगताः आसन् ।

समरबाहुः स्वर्णाचार्यम् अपृच्छत् - ''महामन्त्रिवर्य ! एतेभ्यः कीदृशः दण्डः विधातव्यः ?'' इति ।

स्वर्णाचार्यः खड्गवर्मजीवदत्ताभ्यां सह क्षणकालं समालोच्य अवदत् - ''महाराज ! वीरपुरमहाराजस्य अग्रिमपदानि अवलम्ब्य निर्णेतव्यः - एतेभ्यः कीदृशः दण्डः दातव्यः इति । यावत् स च अंशः निर्णीतः न भवति तावत् एते अस्माकं कारागारे भवन्तु नाम'' इति ।

समरबाहुः अवदत् - ''युक्तं मार्गदर्शनं भवतः'' इति ।

अद्यावधि सः लुण्ठाकनायकमात्रम् आसीत् । किन्तु इदानीं तस्य वचने व्यवहारे च राजोचितलक्षणानि दृश्यन्ते स्म । एतत् दृष्ट्वा आश्चर्यम् अनुभवन् खड्गवर्मा जीवदत्तं मन्दस्वरेण अवदत् - ''एकः सामान्यः विजयः अहो, समरबाहौ महत् परिवर्तनम् अजनयत्'' इति ।

समरबाहुः खड्गवर्मजीवदत्तौ पश्यन् अवदत् - ''अस्माकं दुर्गं प्रति गच्छाम किम् ?'' इति ।

''राजाज्ञां को वा तिरस्कर्तुम् अर्हति ? अस्तु, गच्छाम तावत्'' इति हसन् उक्तवान् जीवदत्तः ।

समरबाहोः अनुचराः उष्ट्रान् अश्वान् च आरूढवन्तः । तेषां पृष्ठतः बन्धीभूताः वीरपुरसैनिकाः आगताः । सर्वेषाम् अग्रे आसन् - समरबाहुः, स्वर्णाचार्यः, खड्गवर्म-जीवदत्तौ च । तेऽपि अश्वम् आरूढवन्तः आसन् ।

अल्पे एव काले ते पर्वतदुर्गं प्राप्तवन्तः । तत्र तैः एकस्य वृक्षस्य अधः स्थितम् एकं पटगृहं दृष्टम् । तस्य पुरतः उच्चासने कश्चन वृद्धः उपविष्टः आसीत् । तं परितः केचन जनाः अपि आसन् ।

एतैः न ज्ञातं यत् एषः वृद्धः कः, कुतः अत्र आगतः इति । एतान् उपस्थितान् दृष्ट्वा सः वृद्धः एव आसनात् उत्थाय खड्गवर्म-जीवदत्तयोः समीपम् आगत्य अवदत् - ''अहं वीरपुरमहाराजस्य प्रधानमन्त्री अस्मि । अस्माकं गुप्तचरद्वारा भवतोः विषये बहुधा श्रुतम् अस्माभिः । भवन्तौ एव खलु खड्गवर्मजीवदत्तौ ?'' इति ।

''आम्'' इति वदन्तौ शिरः चालयन्तौ खड्गवर्मजीवदत्तौ तं वृद्धं नमस्कृतवन्तौ । ततः तौ अश्वस्य उपरि स्थितान् परिचाययन्तौ

अवदताम् – ''एषः पर्वतदुर्गराजः समरबाहुः । एषः तस्य महामन्त्री स्वर्णाचार्यः'' इति ।

वृद्धः मन्त्री शिरः चालयन् अवदत् – ''स्वशक्त्या ये प्रदेशाः जिताः तेषु समरबाहु-राजस्य शासनं भवितुम् अर्हति । वीरपुरस्य राज्ञः प्रतिनिधीभूय प्रधानमन्त्री अहम् एतत् घोषयन् अस्मि । मया तु आगतं भवतोः मेलनार्थम् । एकान्ते भवद्भ्यां सह मया वार्तालापः करणीयः अस्ति'' इति ।

स्वस्य राजत्वाङ्गीकारं श्रुत्वा नितरां सन्तुष्टः आसीत् समरबाहुः । सः वीरपुरीयसेनाध्यक्षम् अवदत् – ''एतस्मात् एव क्षणात् भवन्तः सर्वे अस्माकम् अतिथयः । अद्य अस्माकम् आतिथ्यं स्वीकृत्य श्वः भवन्तः स्वराजधानीं गन्तुम् अर्हन्ति'' इति ।

वीरपुरीयः प्रधानमन्त्री मन्दहासपूर्वकं समरबाहुं दृष्ट्वा खड्गवर्मजीवदत्ताभ्यां सह किञ्चिद्दूरं गत्वा अवदत् – ''अयि वीरौ ! गुप्तचरद्वारा अस्माभिः भवतोः विषये बहुधा श्रुतम् आसीत् । एकस्मात् यक्षतः तु ततोऽपि अधिकतया श्रुतम्'' इति ।

''यक्षः ! सः कः ?'' इति आश्चर्येण पृष्टवन्तौ खड्गवर्मजीवदत्तौ ।

ततः जीवदत्तः खड्गवर्माणम् अवदत् – ''एषः सः एव न स्यात् खलु, यश्च पद्मपुरस्य राजकुमारीं पद्मावतीम् अपहृतवान् आसीत् ?'' इति ।

खड्गवर्मा अपि यक्षविषये ज्ञातुं परम-कुतूहली आसीत् । किन्तु मन्त्री किमपि अवदन् अग्रे गच्छन् आसीत् । सः समीपस्थे एकस्मिन् पर्वतशिखरे स्थित्वा पर्वतमूले प्रवहन्तीं नदीं दर्शयन् अवदत् – ''वीरौ, नद्यां रथाकारिका काचित् नौका दृश्यते खलु ?'' इति ।

खड्गवर्मजीवदत्तौ तां नौकां दृष्टवन्तौ । सा च शिलामयरथाकारिका आसीत् । तस्याः विषये ताभ्यां पद्मपुरे श्रुतम् आसीत् । अरण्यपुरे प्रत्यक्षं दृष्टम् आसीत् अपि ।

जीवदत्तः महता उत्साहेन स्वस्य दण्डम् उन्नीय – ''अहो, बहूनां वर्षाणाम् अनन्तरम् एषः यक्षः इदानीं युद्धाय सन्नद्धः सन् उपस्थितः अस्ति । स्वशक्तिं प्रदर्शयितुम् आवाभ्याम् अपि उत्तमः अवकाशः प्राप्तः अस्ति इदानीम्'' इति वदन् नद्याः दिशि वेगेन प्रस्थितवान् । – *(अनुवर्तते)*

कारागारम् एव प्रियम्

कदाचित् राजभवने चौर्यं कुर्वन् कश्चन चोरः गृहीतः जातः । चौर्यसमये कञ्चित् सैनिकं व्रणितं कृतवान् अपि आसीत् सः । सः सैनिकः तं राजसमीपं नीत्वा प्रवृत्तं सर्वं श्रावितवान् ।

सर्वं श्रुत्वा क्रुद्धः राजा आज्ञापितवान् - ''पञ्च वर्षाणि एषः कारागारे भवतु । मुक्तिप्राप्तिदिने एषः पुनरपि मत्समीपम् आनेतव्यः'' इति ।

ततः पञ्च वर्षाणि अतीतानि । सैनिकाः तं चोरं राजसमीपम् आनीतवन्तः । चोरः नितरां कृशः जातः आसीत् । रोगग्रस्तः इव परिलक्ष्यते स्म सः । तं करुणया पश्यन् राजा अवदत् - ''अन्धकारमये कारागारे भवता प्रभूतं कष्टं निरूढम् इति भाति । अद्य तु भवान् कारागारात् विमुक्तः । महतः आनन्दस्य विषयः खलु एषः ?'' इति ।

तदा चोरः राजानं नमस्कुर्वन् उक्तवान् - ''महाराज ! अन्धकारमये कारागारे आदौ मया कष्टम् अनुभूयते स्म । किन्तु गच्छता कालेन सुखम् एव अनुभूतं मया । न तत्र उदरपूरणस्य चिन्ता, न वा कुटुम्बपोषणचिन्ता । प्रतिदिनं समये समये भोजनं भवति स्म । 'धनसम्पादनार्थम् अद्य कुत्र गन्तव्यम्' इति चिन्ता न आसीत् । शैत्यवृष्टितापादयः मां न बाधन्ते स्म । अतः कारागारे एव मम अधिकसुखम् आसीत् । अतः कारागारे एव वासार्थं कृपया मह्यम् अनुमतिः दातव्या इति मम सविनयप्रार्थना'' इति ।

एतत् श्रुत्वा राजा अवगतवान् यत् महति कष्टे स्थितोऽपि जनः अल्पे एव काले परिस्थितेः एव दासः सन् तदेव जीवनं रमणीयं भावयति इति । अतः सः उक्तवान् - ''भोः, अलं भीत्या । कारागारजीवनं यथा तथैव स्वतन्त्रं जीवनम् अपि अचिरात् एव भवतः प्रियं भविष्यति । अद्य आरभ्य भवान् अस्माकम् उद्यानपालकस्य साहाय्यं करोतु । तदेव कार्यं भवतः प्रियं भविष्यति अल्पे एव काले'' इति ।

वेताल-कथा

विलक्षणं मौनम्

भयङ्करी रात्रिः सा । धाराकारेण वृष्टिः पतन्ती आसीत् । निरन्तरमेघगर्जनैः वातावरणं भयं जनयत् आसीत् । यदा आकाशे विद्युत्सञ्चारः भवति स्म तदा पिशाचानां विकृतानि मुखानि दृष्टि-गोचराणि भवन्ति स्म । राजा त्रिविक्रमः कठिनं कण्टकमयं मार्गम् अतिक्रम्य वृक्षस्य शाखायां लम्बमानं शवं स्कन्धे आरोप्य श्मशानं प्रति प्रस्थितवान् । तदा शवान्तर्गतः वेतालः अवदत् – "अये राजन् ! मां निरन्तरं वहतः भवतः किं चिन्तनम् अस्ति ? राज्ञः सुशान्तस्य यादृशं मौनं ततोऽपि विलक्षणम् अस्ति भवतः मौनम् । किं भवता सुशान्तस्य कथा

ज्ञायते ? न खलु ? तां ज्ञापयितुं, भवतः मार्गायासस्य परिहारार्थं च तां विस्तरेण श्रावयामि । श्रद्धया शृणोतु तावत्'' इति ।

अनन्तरं वेतालेन कथा आरब्धा -

पुष्यनगरस्य राजा सुशान्तः चतुरः दयालुः च । सः साधूनां विषये आदरवान्, कलाविदां प्रोत्साहकः, कवीनां पोषकः च आसीत् । प्रजाः सर्वदा सन्तुष्टाः भवेयुः इति, राज्यं समृद्धं भवेत् इति च सः सदा प्रयत्नशीलः भवति स्म । तस्य एका एव न्यूनता नाम 'कोपः' । अपेक्षानुसारं यदि कार्यं न भवति तर्हि तस्य कोपः प्रवृद्धः भवति स्म ।

एकदा राजगृहस्य पाचकाः विशेषातिथीनां निमित्तं राज्ञा सूचितं भक्ष्यं सम्यक् न कृतवन्तः । तदा ते न केवलम् उद्योगात् च्याविताः, अपि तु राज्यात् एव बहिष्कृताः ।

यदि कश्चन अधिकारी दोषी इति ज्ञायते अथवा कर्तव्यलोपं कृतवान् भवति, तर्हि तेन राज्ञः कोपः सम्मुखीकरणीयः भवति स्म एव । तादृशः उद्योगात् एव च्युतः भवति स्म । राज्ञः सुशान्तस्य कोपप्रवृत्त्या प्रजाः क्लेशम् अनुभवन्ति स्म बहुधा ।

एकदा कश्चन संन्यासी सुशान्तस्य सभां प्रविष्टवान् । सः राज्ये विद्यमानेषु केषुचित् मन्दिरेषु प्रवचनादिकं कर्तुम् इच्छति स्म ।

राजा विनयपूर्वकं - ''महात्मन्, कः भवान् ? कुतः आगनवान् ?'' इति पृष्टवान् ।

तदा सः संन्यासी अवदत् - ''अहं प्राणानन्दः । अहं गतेषु दशसु वर्षेषु हिमालये तपः आचरामि स्म । अहं सद्यः एव हिमालयात् अत्र आगतवान् अस्मि । मम गुरुणा उक्तम् अस्ति - 'स्वसमस्यानां परिहारमात्रं भवतः जीवनस्य उद्देशः न । ये भाग्यहीनाः सन्ति तादृशानां ज़नानां मार्गदर्शनम् अपि करणीयं भवता' इति । अतः अहम् अत्र आगतवान् अस्मि'' इति ।

एतत् श्रुत्वा राजा विनयपूर्वकम् उक्तवान् - ''स्वामिन्, यदि भवान् अत्र स्थित्वा मम मत्प्रजानां च मार्गदर्शनं करिष्यति तर्हि वयं कृतज्ञाः स्याम'' इति ।

तदा संन्यासी हसन् - ''राजन्, भवतः स्नेहेन, उत्तमस्वभावेन च अहं वशीकृतः अस्मि । अतः अहम् अत्र कानिचन दिनानि स्थास्यामि'' इति अवदत् ।

'राजोद्याने स्वामिने एकं कुटीरं निर्मान्तु' इति भटान् आज्ञाप्य राजा उद्यानपालकं सुमङ्गलम् आहूय - 'स्वामिनः सर्वविधम्

आनुकूल्यं भवान् चिन्तयतु' इति सूचितवान् ।

सुमङ्गलसंन्यासिनोः दृढा मैत्री उत्पन्ना । सुमङ्गलः पत्न्या, पुत्राभ्यां च सह उद्याने एकस्मिन् कुटीरे वसति स्म । प्रतिदिनं प्रातः प्रार्थनानन्तरं प्राणानन्दः घण्टाद्वयं यावत् राज्ञा सह भवति स्म । सुशान्तः स्वामिनः प्रवचनानि श्रद्धया शृण्वन् तस्य अनुसरणं कर्तुं प्रयत्नं करोति स्म । अनन्तरं प्राणानन्दः अन्यानि मन्दिराणि गत्वा तत्र सम्मिलितान् जनान् उद्बोधयति स्म । रात्रौ सुमङ्गलेन सह भोजनं स्वीकरोति स्म ।

एकदा प्राणानन्दः राज्ञा सह उद्याने उपविश्य वार्तालापं कुर्वन् आसीत् । सुमङ्गलः निकटे एव कञ्चित् गुल्मं समीकुर्वन् आसीत् । तदा स्वामिनं पीडयन्तः केचन भ्रमराः तेन अवलोकिताः । अनुक्षणं सः तत्र गत्वा भ्रमरान् निवारयितुं प्रयत्नं कृतवान् ।

किन्तु 'मध्ये आगत्य सम्भाषणे व्यत्ययम् आनीतवान्' इति कारणतः सुमङ्गलस्य व्यवहारेण राजा क्रुद्धः अभवत् । सः कोपेन अवदत् - "आवयोः सम्भाषणे व्यत्ययम् आनयतः कियत् धाष्ट्यं भवतः ? कः भवन्तं मध्ये प्रवेष्टुम् उक्तवान् ? भ्रमरैः स्वामिनः कष्टं भवति चेत् अहं साहाय्यम् अकरिष्यं खलु ! मम दृष्टिपथात् दूरं गच्छतु । पुनः भवन्तम् अत्र द्रष्टुं न इच्छामि अहम्" इति ।

सुमङ्गलः स्तब्धः अभवत् । किन्तु प्राणानन्दः तस्य रक्षणं कर्तुम् आगतवान् । सः राजानम् उद्दिश्य - "तं मा निन्दतु पुत्र ! वस्तुतः पश्यामः चेत् तस्य आशयः उत्तमः एव आसीत् । कोपकरणं सुलभम् । किन्तु

कोपकाले स्वीकृताः निर्णयाः दोषपूर्णाः भवितुम् अर्हन्ति । यदा भवान् कोपं प्राप्स्यति तदा तावत्पर्यन्तं भवान् मौनं तिष्ठतु यावत् भवान् पूर्वतनस्थितिं न प्राप्स्यति । यदि भवान् कोपसमये सुमङ्गलम् उद्योगात् निष्कासयति तर्हि तादृशम् अपरं निष्कपटं समर्थं सेवकम् अन्वेष्टुं कष्टम् अनुभवेत्" इति अवदत् ।

सुशान्तः तस्य उपदेशम् अनुसृत्य सुमङ्गलं क्षान्तवान् । प्राणानन्दस्य चातुर्यपूर्णैः वचनैः राज्ञः उपरि महान् प्रभावः जातः ।

एकदा प्राणानन्दः राजानम् उक्तवान् - "परोपकारः एव मम जीवनस्य लक्ष्यम् । तदहं कुर्वन् अस्मि । मम कार्यं भवतः प्रजानां कृते केवलं सीमितं नास्ति । अहम् अन्यानि स्थानानि अपि गन्तुम् इच्छामि । सर्वेषां मार्गदर्शनं कर्तुम् इच्छामि" इति ।

किन्तु प्राणानन्दस्य गमनं सुशान्तः न इष्टवान् । तदा प्राणानन्दः राजानं सान्त्वयन् – 'मासत्रये एकवारम् अहं पुष्पनगरम् आगमिष्यामि । मासं यावत् अत्रैव स्थास्यामि' इति उक्तवान् । राज्ञा एतत् अङ्गीकृतम् ।

मासत्रयम् अतीतम् । एकदा सायङ्काले प्राणानन्दः पुष्पनगरं प्रति आगत्य स्वकुटीरं प्रति गतवान् । प्राणानन्दस्य आगमनं सुमङ्गलः न जानाति स्म । अन्धकारः जातः आसीत् । प्राणानन्दस्य पिपासा अभवत् । जलपात्रे जलं पूरयितुं सः सरोवरस्य समीपं गतवान् । यदा सः जलपात्रं जले निमज्जितवान् तदा जलपूरणस्य शब्दः श्रुतः ।

सुमङ्गलस्य कुटीरं समीपे एव आसीत् इत्यतः सः जलपूरणशब्दं श्रुतवान् । सः चिन्तितवान् यत् केचन प्राणिनः उद्यानं प्रविष्टवन्तः सन्ति इति । अनुक्षणं सः धावन् स्वस्य शूलं सरोवरस्य दिशि प्रक्षिप्तवान् ।

अहो दुर्विधिः ! शूलं स्वामिनः शरीरे संलग्नम् अभवत् । अनुक्षणं प्राणानन्दस्य क्रन्दनं श्रुतम् । प्राणानन्दस्य ध्वनिम् अभिज्ञाय भयेन तस्यां दिशि धावितवान् सुमङ्गलः । प्राणानन्दः श्वासोच्छ्वासार्थम् अपि कष्टम् अनुभवन् आसीत् । स्वामिनः पादौ गृहीत्वा सुमङ्गलः क्षमायाचनां कृतवान् । प्राणानन्दः – ''मम पृष्ठभागे संलग्नं शूलम् उत्पाटयतु । तेन अहं सुखेन मरणं प्राप्तुं शक्नोमि'' इति कष्टेन अवदत् । सुमङ्गलः मन्दं शूलम् उत्पाट्य स्वामिनम् अधः शायितवान् ।

सुमङ्गलः रुदन् – ''क्षम्यतु माम् । एवं करणस्य मम सर्वथा उद्देशः न आसीत्'' इति अवदत् ।

स्वामी हसन् - ''अहं जानामि । अहं भवन्तं क्षान्तवान् अस्मि'' इति उक्त्वा प्राणान् अत्यजत् ।

अनुक्षणं सुमङ्गलः भीत्या कम्पितः अभवत् । 'यदि राजा एतं विषयं शृणोति तर्हि मम का गतिः स्यात् ? मया मम कुटुम्बेन च कष्टं सोढव्यं भवेत्' इति सः चिन्तां प्राप्तवान् । झटिति सः कुटीरं गत्वा प्रवृत्तं सर्वं पत्नीम् उक्तवान् । रात्रौ एव ते ततः निर्गतवन्तः ।

परेद्यवि रक्षकाः उद्याने प्राणानन्दस्य शरीरं दृष्टवन्तः । ते सुमङ्गलम् अन्विष्टवन्तः । किन्तु सुमङ्गलः कुत्रापि न दृष्टः । केनापि कारणेन सुमङ्गलः एव स्वामिनं मारितवान् स्यात् इति रक्षकाः चिन्तितवन्तः । ते तां वार्तां राजानं निवेदितवन्तः । सुशान्तः कोपेन सुमङ्गलम् अन्वेष्टुं जनान् प्रेषितवान् । किन्तु सुमङ्गलः कुत्रापि न दृष्टः ।

तन्मध्ये सुमङ्गलः प्रतिवेशिराज्ये कञ्चित् उद्योगं प्राप्तवान् । किन्तु सः तृप्तः नासीत् । सः पुष्पनगरं प्रति एव गन्तुम् इच्छति स्म । एकवर्षानन्तरं कदाचित् सः पुष्पनगरं गत्वा पूर्वतनमित्रेण मिलितवान् । सः राजगृहे उद्योगी आसीत् । 'राजा प्राणानन्दस्य मरण-विषये मां क्षान्तवान् अस्ति उत न इति ज्ञात्वा आगच्छतु' इति मित्रं प्रार्थितवान् ।

सः राजोद्योगी राज्ञा सह सम्भाषणस्य अवसरं प्रतीक्षमाणः आसीत् । कदाचित् तदानीन्तनः उद्यानपालकः उद्याने नूतनान् परिष्कारान् कर्तुं राज्ञः अनुमतिं प्रार्थयन् आसीत् । तदा सः राजोद्योगी मध्ये प्रविशन्

- 'सुमङ्गलः उत्तमः उद्यानपालकः आसीत् । उद्यानार्थं सः एतावन्तं व्ययं न करोति स्म' इति अवदत् । किन्तु राजा किमपि न उक्तवान् । राजोद्योगी सुमङ्गलं 'दूरे एव तिष्ठतु' इति असूचयत् । षण्मासानन्तरं पुनश्च सुमङ्गलः मित्रं प्रार्थितवान् । पुनश्च यदा अवसरः प्राप्तः तदा सः राजोद्योगी सम्भाषणसमये सुमङ्गलस्य विषयं प्रस्तावितवान् । तदापि राजा मौनम् आश्रितवान् ।

पुनश्च षट् मासाः अतीताः । सुमङ्गलः मौनेन स्थातुं न शक्तः । सः सर्वं सम्मुखीकर्तुं सिद्धः सन् पत्नीपुत्रैः सह पुष्पनगरम् आगत्य साक्षात् राजसभां प्रविष्टवान् । राज्ञः पादयोः पतित्वा स्वामिनः आकस्मिकमरणस्य वृत्तान्तं श्रावितवान् ।

तदा राजा - ''सुमङ्गल ! अहं सर्वं जानामि । भवान् कदापि तथा कर्तुं न अर्हति

इति अहं जानामि । भवान् पुनः आगत्य उद्योगं करोतु'' इति उक्तवान् ।

वेतालः एवं कथां समाप्य राजानम् अवदत् - ''हे राजन् ! यदा सुमङ्गलस्य मित्रं प्रथमवारं सुमङ्गलस्य गुणगानं राजसभायाम् अकरोत् तदा राज्ञः कापि प्रतिक्रिया नासीत् । द्वितीयवारम् अपि तथैव । किन्तु यदा सुमङ्गलः वर्षद्वयानन्तरं स्वयं गत्वा राज्ञः पादौ गृहीतवान् तदा राजा तं क्षान्त्वा पुनश्च उद्योगे किमर्थं नियुक्तवान् ? एतेन राज्ञः व्यवहारे विलक्षणता खलु दृश्यते ? 'यदा सः सुमङ्गलं दृष्टवान् तदा एव सः निरपराधी इति ज्ञातवान्' इति भवान् भावयति किम् ? यदि भवान् एतेषां प्रश्नानाम् उत्तरं जानन् अपि न वदेत् तर्हि भवतः शिरः सहस्रधा भग्नं भवेत्'' इति ।

तदा राजा त्रिविक्रमः उत्तररूपेण - ''सुशान्तस्य व्यवहारे न किञ्चिदपि विलक्षणता अस्ति । स्वामिनः आकस्मिक-मरणस्य कारणं सुमङ्गलः न इति राजा पूर्वमेव ज्ञातवान् आसीत् । सः उत्तमः शासकः इति भवान् जानाति एव । अतः सः स्वस्य उद्यानपालकं सम्यक् एव जानीयात् । सः सुमङ्गलम् अन्वेष्टुं जनान् प्रेषितवान् । यतः स्वामिनः आकस्मिकमरणेन सः कुपितः आसीत् । कोपः एव राज्ञः दौर्बल्यम् इति वयं जानीमः । यदा कोपः भवति तदा निर्णयः न स्वीकरणीयः इति स्वामिना आदिष्टः आसीत् राजा । यदा राजोद्योगी उद्यानपालकविषयस्य प्रस्तावं कृतवान् तदा राज्ञः कोपः न अपगतः आसीत् । किन्तु सः स्वस्य मार्गदर्शकस्य वचनं स्मृतवान्, मौनम् आश्रितवान् च । यतः कोपकाले निर्णयः सम्यक् न भवेत् इति तस्य आतङ्कः आसीत् । तदा यदि सुमङ्गलस्य प्रवेशः अभविष्यत् तर्हि निश्चयेन तस्य हानिः अभविष्यत् । तस्याः घटनायाः वर्षद्वयस्य अनन्तरं सः राजसभां प्रविष्टवान् । तदा राज्ञः कोपः न्यूनः जातः आसीत् । अतः तेन यथायोग्यम् आचरितम् । राजा तस्य मार्ग-दर्शकस्य स्वामिनः वचनानि अनुसृत्य जिह्वां कोपं च नियन्त्रयन् आसीत् । तदनन्तरमेव सः सुमङ्गलेन सह वार्तालापं कृतवान्'' इति उक्तवान् ।

एवं वदता राज्ञा मौनभङ्गः कृतः आसीत् इत्यतः शवान्तर्गतः वेतालः पुनश्च अदृश्यः भूत्वा वृक्षे लम्बमानः अतिष्ठत् ।

विघ्नेश्वरः

सत्यलोके कमलासने उपविश्य आदिनं सृष्टिकरणात् ब्रह्मा श्रान्तः आसीत् । कल्पान्तकालः यदा आसन्नः तदा निद्रा-सूचिका तन्द्रा तम् आवृणोत् । यदा यदा सः जृम्भणम् अकरोत् तदा पर्वतेषु अग्निः समुत्पन्नः । निद्राकारणतः यदा तस्य नेत्रे निमीलिते जाते तदा आकाशस्थैः प्रलय-कालीनमेघैः मुलसधारया वर्षद्भिः जगत् जलेन आप्लावितम् । अतः सर्वं जले निलीनं जातम् । सर्वासु दिक्षु अन्धकारः प्रसृतः ।

एतस्मिन् प्रलयकाले ब्रह्मा निद्रां कृत-वान् । प्रलयकालः तस्य रात्रिसमयः । नूतनकल्पस्य आरम्भकालः आसन्नः । यदा जगति प्रकाशस्य प्रसारः आरब्धः तदा सरस्वतीदेवी वीणां गृहीत्वा भूपालरागस्य आलापनं कृतवती । एतेन ब्रह्मणः निद्रा अपगता जाता । ब्रह्मा पद्मासने उपविश्य चतसृषु दिक्षु दृष्टिं प्रसारितवान् ।

अथः समग्रं जगत् जलमयं सत् कल्लोलितं दृष्टं तेन । तेषां तरङ्गाणां मध्ये एकः श्वेताकिरणपुञ्जः तेन दृष्टः । तरङ्गाणां मध्ये तरत् किञ्चन वटपत्रं, वटपत्रस्य उपरि शयानः कश्चन शिशुः, तेन शिशुना क्रियमाणः वामपादाङ्गुष्ठस्य लेहनं च तेन दृष्टम् ।

ब्रह्मा नेत्रे निमील्य ध्यानं कृतवान् । यदा सः नेत्रे उन्मीलितवान् तदा एकं विचित्रं दृश्यं तेन दृष्टम् ।

ब्रह्मा अवगतवान् यत् सः शिशुः न अन्यः, अपि तु विराट्स्वरूपि परब्रह्म एव इति । इदानीं तस्य शिशोः शिरः गजशिरसा समानं दृश्यते स्म । सः शिशुः लघ्व्या शुण्डया दक्षिणपादं गृहीत्वा मुखे स्थापयन् आसीत् ।

शिशोः मुखं प्रसन्नम् आसीत् । चन्द्रः इव कान्त्या प्रकाशते स्म तत् । तस्य चत्वारः

१. वटपत्रे बालगणपतिः



हस्ताः आसन् । ब्रह्मा आश्चर्येण तम् एव शिशुं पश्यन् आसीत् । अकस्मात् सः शिशुः अदृश्यतां गतः । तस्मिन् प्रदेशे कश्चन मृद्राशिः दृष्टिगोचरः जातः ।

गच्छता कालेन जलतः विशालः भूभागः उत्पन्नः । समुद्रः अपि निर्मितः अभवत् ।

ब्रह्मा सृष्टेः आरम्भं कृतवान् । आदौ नदीपर्वतादयः उत्पादनीयाः इति सङ्कल्प्य ब्रह्मा कमण्डलुतः जलं स्वीकृत्य भूमौ पातितवान् । ततः वृक्ष-सस्य-खनिजादीनाम् उत्पत्तिं सङ्कल्प्य जलम् अभिमन्त्र्य भूमिं सिक्तवान् । ततः सः समुद्रे मत्स्यान्, भूमौ पशुपक्षिकृमि-कीटादीन् च सृष्टवान् । एतदनन्तरं मनुष्याणां सृष्टिं कर्तुम् इच्छन् सः कमण्डलुजलं हस्तेन स्वीकृत्य भूमौ पातितवान् ।

यदा ब्रह्मा सृष्टिक्रियायां मग्नः आसीत् तदा सरस्वती वीणावादननिरता आसीत् । तदवसरे अप्रयत्नेन अपस्वरः उत्पन्नः । एतत् श्रुत्वा आश्चर्यचकिता सरस्वती अधः दृष्टवती । पत्न्याः आश्चर्यस्य कारणं किम् इति न ज्ञातं ब्रह्मणा । सोऽपि कमलासनस्थः एव अवनम्य अधः दृष्टवान् ।

तत्र पर्वताः अधोमुखाः आसन् । तेषां शिखराणि भूमौ लग्नानि आसन् । मूलभागाः सूर्यकिरणप्रसारे अवरोधं जनयन्तः वर्धमानाः दृश्यन्ते स्म । नद्यः समुद्रात् निर्गत्य ऊर्ध्वमुखं वहन्त्यः आसन् । वृक्षाः अपि अधोमुखाः आसन् । तेषां मूलानि आकाशं स्पृशन्ति स्म ।

समुद्रस्य तरङ्गाणाम् उपरि मत्स्यादि-जलचराः दृश्यन्ते स्म । केचन क्षणे क्षणे वर्धमानाः आसन् । पुनः केचन पक्षिणः इव डयन्ते स्म । पशवः विकृताकाराः दृश्यन्ते स्म । तेषु केषाञ्चित् शिरः न आसीत् । पुनः केषाञ्चित् पुच्छम् । केचन पशवः एकपादवन्तः आसन्, पुनः केचन त्रिपादवन्तः । केषाञ्चित् नेत्रकर्णादयः न आसन्, पुनः केषाञ्चित् मुखम् एव न आसीत् । केषाञ्चित् मुखं पृष्ठभागे आसीत्, पुनः केषाञ्चित् शिरसि पुच्छम् आसीत् । केषाञ्चित् पक्षिणां पक्षौ न आस्तां, पुनः केषाञ्चित् पादौ । अतः ते पक्षिणः उड्डयने असमर्थाः आसन् ।

एतत् सर्वं दृष्ट्वा भीतिं प्राप्य ब्रह्मा मानवानां दिशि दृष्टिं प्रसारितवान् ।

तत्रापि एषा एव कथा । केषाञ्चित् शिरोद्वयम् आसीत् । एकं शिरः पुरुषीयं चेत् अपरं महिलीयम् । काश्चित् महिलाः गजाकारिकाः ताडवृक्षाकारिकाः च आसन् । केषाञ्चित् एकः पादः त्रयः पादाः वा आसन् ।

केषाञ्चित् शिरः उदरभागे आसीत् । कबन्धाः इव दृश्यन्ते स्म ते । आक्रन्दनं श्रूयते स्म तेषाम् । केचन उन्मादेन नृत्यन्ति स्म । पुनः केचन विलक्षणव्यवहारं कुर्वन्ति स्म ।

कश्चन दृढकायः पुरुषः ताडवृक्षसदृशीं विकृताकारां महिलां प्रदर्शयन् आकाशस्य दिशि मुखं कृत्वा उच्चस्वरेण - ''हे ब्रह्मदेव । एतादृश्या सह अहं कथं वा मम गृहस्थजीवनं यापयितुं शक्नुयाम् ?'' इति अपृच्छत् ।

केचन विकृताकाराः मानवाः रुदन्तः ब्रह्माणं निन्दन्ति स्म - ''हे ब्रह्मदेव । भवान् तु चतुर्मुखः इति निर्दिश्यते । चत्वारि मुखानि धरन् अपि भवान् सामान्यबुद्धिमान् अपि न इति भाति । किमर्थं भवता वयम् एतादृश-रूपयुक्ताः सृष्टाः ?'' इति ।

तेषां निन्दनकोलाहलाक्रन्दनादिकं श्रुत्वा वस्तुतः अपि ब्रह्मणः चतुर्षु अपि शिरस्सु भ्रमणम् उत्पन्नम् इव । तस्य अष्टानाम् अपि नेत्राणां पुरतः अन्धकारः प्रसृतः । आश्चर्य-चकितः सः आर्तदृष्ट्या सरस्वतीं दृष्टवान् । सरस्वती अपि असहायकतां दर्शयन्ती मन्दहासं प्रकटय्य मौनम् आश्रितवती ।

ब्रह्मा किञ्चित् विचिन्त्य उच्चस्वरेण अवदत् - ''मम सृष्टेः एषा दुस्थितिः किमर्थं अभवत् ? मया तु योग्येन क्रमेण सङ्कल्प्य जगतः निर्माणम् आरब्धम् आसीत् । तथापि एवं किमर्थं जातम् ?'' इति ।

ब्रह्मणः वचनं दशसु अपि दिक्षु प्रतिध्वनितं जातम् । किङ्कर्तव्यतामूढतया सर्वत्र पश्यता ब्रह्मणा एकः प्रकाशः दृष्टः । तत्र तेन काऽपि अपूर्वा मूर्तिः दृष्टा । सा मूर्तिः गजशिरोयुक्ता

आसीत् । तस्या चत्वारः हस्ताः आसन् । तेषु चतुर्षु हस्तेषु क्रमेण पाशः, अङ्कुशः, कलशः, परशुः च आसन् । सा मूर्तिः पूर्णचन्द्रः इव प्रकाशते स्म । तस्याः मुखकान्तिः सर्वत्र प्रसृता आसीत् ।

तस्मिन् समये सरस्वती स्ववीणया ओङ्कारनादम् उत्पादितवती । तस्याः अङ्गुलयः वीणातन्त्रीषु स्वयं चलन्ति स्म । आदौ वीणातः मालवगौलरागस्य उत्पत्तिः जाता । ततः सः एव रागः हंसध्वनिरूपेण परिवृत्तः । गजाननाकारं प्राप्तवती सा मूर्तिः वटपत्रे स्थिता सती ब्रह्माणम् अभयमुद्रया आशिषा अनुगृहीतवती । तां परितः शरत्कालीनचन्द्रकिरणाः इव काचित् अपूर्वा कान्तिः प्रसृता आसीत् ।

ब्रह्मा अप्रयत्नेन करौ योजयित्वा अवदत् - ''हे महानुभाव ! अपूर्वाकारः कः भवान् ?

भवान् कः इति बहुधा चिन्तनेन अपि मया न ज्ञातम् । कृपया स्वस्य रूपस्य परिचयकथनेन माम् अनुगृह्णातु'' इति ।

''वत्स ! ब्रह्मदेव ! सङ्कल्पेन सह विकल्पः अपि अनुविद्धः भवति सदापि । सः एव उच्यते 'विघ्नः' इति । विघ्नान् निवार्य सङ्कल्पपूर्तिं कुर्वन् अहं विघ्नेश्वरः अस्मि । विघ्नानां नेतृत्वं वहन्तं विकल्पम् अहं स्वस्य परशुना छिनद्मि । कलशेन सङ्केत्यमानं साफल्यं गमयामि सर्वाणि कार्याणि इत्यतः अहं विघ्नविनायकः अस्मि । पृथिव्यप्तेजोवाय्वाकाशरूपाणां पञ्चभूतानां गणस्य अधिपतिः अस्मि इत्यतः अहं गणपतिः अपि अस्मि । खाद्यपदार्थान् क्षेत्रादीन् च नाशयतः विघ्नकारकान् गजान् तीक्ष्णेन अङ्कुशेन निगृह्य पाशेन बध्नामि । अतः भवान् मां विघ्नेश्वरनाम्ना निर्देष्टुम् अर्हति'' इति गम्भीरवाण्या अवदत् विघ्नेश्वरः ।

तदा ब्रह्मा अवदत् - ''हे विघ्नेश्वर ! हे देव ! मम सृष्टिकार्ये एतादृशः विघ्नः किमर्थम् उत्पन्नः ? उत्तमसृष्टिं कर्तुं मया कः मार्गः आश्रयणीयः ? अहं किङ्कर्तव्यतामूढः अस्मि । कृपया इतिकर्तव्यतां बोधयतु'' इति ।

''विघ्नस्य परिचयः भवतः भवतु इति उद्देशेन एव एतत् सर्वं प्रवृत्तम् । वटपत्रशायिबालगणपतिरूपेण अहं भवते दर्शनं दत्तवान् आसम् । तस्मिन् समये भवता मद्विषये न चिन्तितम् एव । मम विषये चिन्तनं नाम सम्भाव्यविघ्नस्य विषये अवधानदानरूपस्य ज्ञानस्य प्राप्तिः । अहं तस्यैव ज्ञानस्य रूपम् । आ ब्रह्मणः आसामान्यजन्तु कार्यारम्भतः पूर्वं कार्यसफलतायै अपेक्षितं ज्ञानं प्राप्नुयात् एव । गजः अग्रिमपदस्थापनात् पूर्वं भूमिं परीक्षते । प्राणिषु हस्ती महाबलवान् । एवमेव ज्ञानक्षेत्रे बुद्धिबलं श्रेष्ठम् । हस्तिनः यादृशी मेधाशक्तिः तादृशी मेधाशक्तिः प्राप्तव्या इत्येतत् सङ्केतयितुम् अहं गजाननः जातः अस्मि । यदा भवान् निद्रायां मग्नः आसीत् तदा सोमकासुरः नाम राक्षसः चतुरः अपि वेदान् अपहृत्य समुद्रतले गोपितवान् आसीत् । महाविष्णुः मत्स्यावतारं धृत्वा तं राक्षसं संहृतवान्, चतुरः वेदान् वटपत्रशायिने मह्यं दत्तवान् च । एतानि स्वीकरोतु भवान् । इतः परं निर्विघ्नतया सृष्टिकार्यं करोतु'' इति उक्त्वा विघ्नेश्वरः ब्रह्मणे वेदान् समर्पितवान् ।

वेदानां प्राप्त्या ब्रह्मा नितरां सन्तुष्टः । विघ्नेश्वरं प्रशंसन् सः उक्तवान् - ''हे विघ्नेश्वर ! इतः परं भवन्तं ध्यात्वा हृत्पूर्वकं

सम्पूज्य च एव अहं सृष्टिकार्ये प्रवृत्तः भविष्यामि । मम सृष्टिकार्यं निर्विघ्नतया यथा प्रचलेत् तथा कृपां करोतु कृपया । एतावता मया या सृष्टिः कृता सा विकृता जाता अस्ति । तस्याः प्रतिस्वीकरणमार्गम् अपि उपदिशतु'' इति ।

ततः विघ्नेश्वरस्य प्रसादेन विकृतसृष्टिः अदृश्या जाता । तदा विघ्नेश्वरः ब्रह्माणम् उक्तवान् - ''हे ब्रह्मदेव ! अहं वक्रतां खण्डशः कृत्वा नाशयामि । मम शुण्डां वक्राकारेण धरन् अहं मम एतत् सामर्थ्यं सङ्केतयामि । वक्रस्य तुण्डस्य (मुखस्य) धारणात् अहं वक्रतुण्डः अस्मि । वक्रतुण्डरूपिणं मां ध्यात्वा यः कार्यारम्भं करोति तस्य कार्ये वक्रता कदापि न भवति । भवान् अपि स्व-इच्छानुरूपं मम रूपं ध्यात्वा सृष्टिकार्यस्य आरम्भं करोतु । सृष्टिः काचित् कला । तस्यां कलायां कापि वक्रता न भवेत् । मां ध्यात्वा सृष्टिकार्यस्य आरम्भं कुर्वतः भवतः कृते एतत् जगत् एव कलानिलयः । इतः परं सर्वे जीविनः मां पूजयितुं यथा शक्नुयुः तथा आदिपूज्यविघ्नेश्वररूपेण, समस्तजगतः रक्षणं कुर्वन् सङ्कल्पसिद्धिकारकस्य सिद्धिविनायकस्य रूपेण, समस्तगणानाम् अधिपतिः सन् गणपतिरूपेण, शिवपार्वत्योः पुत्ररूपेण च अहम् अवतारं करिष्यामि'' इति ।
एतावत् उक्त्वा विघ्नेश्वरमूर्तिः अदृश्यतां गता ।

एतदवसरे सरस्वती हिन्दोलरागं श्रीरागं च आश्रित्य स्ववीणया मङ्गलध्वनिम् उत्पादयन्ती आकाशं पुलकितं कृतवती ।

ब्रह्मदेवः 'विघ्नेश्वराय नमः' इति उक्त्वा सृष्टिकार्यस्य आरम्भं कृतवान् । एतदवसरे सृष्टिकार्यं सुन्दरं निर्विघ्नं च आसीत् । गम्भीर-विशाल-पर्वत-पङ्क्तयः अमृततुल्यजलयुक्ताः नद्यः, सुन्दराणि वनानि, वर्णमयपाञ्चालिकाः इव स्थिताः जीविनः, शारीरकतया मानसिकतया च शक्तिशालिनः मानवाः इत्यादयः ब्रह्मणा सृष्टाः । एतत् जगत् कलानिलयः एव आसीत् तस्य । वाग्देवी सरस्वती स्ववीणातः स्वरान् उत्पादयन्ती जगते सङ्गीतशास्त्रं दत्तवती । जीविसमुदायः समस्तशुभलक्षणैः विकासं प्राप्नोत् । जटाभिः उपेतः सन् विकासं प्राप्नुवन् वटवृक्षः इव जगत् विकासं प्राप्नुवत् आसीत् ।

वार्ताविशेषाः

नक्षत्रोद्यानम्

अश्विनीतः आरभ्य रेवतीपर्यन्तं २७ नक्षत्राणि सन्ति इति वयं जानीमः एव । जन्म प्राप्तवतः हिन्दोः जन्मनक्षत्रं भवति एतेषु अन्यतमम् । एकैकस्य नक्षत्रस्यापि सम्बन्धी कश्चन पशुः, पक्षी, वृक्षः, पुष्पं च भवति । तमिळुनाडुराज्ये ऊतकमण्ड्-उदकमण्डलयोः मध्ये 'मेट्टुपालयम्' इत्यत्र स्थितम् एकं विद्यालयं चित्वा कोयम्बत्तूरस्थया 'वेदिक् इण्डिया सोसैटी' इत्येतया संस्थया बालाः स्वजन्म-नक्षत्रसम्बद्धम् एकं वृक्षं यथा आरोपयेयुः तथा प्रेरणा कृता । छात्रैः प्रतिज्ञातं यत् विद्यालय-त्यागपर्यन्तम् अपि तच्च सस्यं पोष्यते इति । इदानीं 'वेदिक् इण्डिया सोसैटी' संस्था चिन्तयति यत् 'नक्षत्रोद्यान' योजना समग्रे राज्ये आरम्भणीया इति ।

जलयन्त्रे मार्जारः

'सेलवेस्टर्' इत्येतत् त्रिमासीयमार्जारस्य नाम । तस्य स्वामिनी कापेन् हागन्वर्या । कदाचित् सः मार्जारः कथमपि क्षालनयन्त्रं प्राविशत् । एतत् स्वामिन्या न लक्षितम् एव । यन्त्रचालनानन्तरं मार्जारस्य क्रन्दनं यदा श्रुतं तदा तया वस्तुस्थितिः ज्ञाता । यन्त्रस्थस्य जलस्य औष्ण्यं वर्धमानम् आसीत् । तथापि तया यन्त्रं स्थगयितुं न शक्तम् । यतः तया 'टैमर्' द्वारा उद्घाटनसमयः यन्त्राय सूचितः आसीत् । अन्ते यदा यन्त्रम् उद्घाटितं तदा मार्जारस्य शरीरं प्राणवायोः अभावतः नीलवर्णतां गतम् आसीत् । सा झटिति मार्जारं पशुचिकित्सालयं नीतवती । केषाञ्चित् दिनानाम् अनन्तरं सः मार्जारः स्वस्थः सन् गृहं प्रत्यागतः । सः मार्जारः क्षालनयन्त्रं किमर्थं प्रविष्टवान् स्यात् ? प्रायः स्यात् शरीरस्वच्छतार्थम् !!

वृक्षेषु संवाहकयन्त्राणि

सिङ्गपूरनगरे वृक्षविषये विशेषास्था दृश्यते । प्रतिवर्षं तत्र दशाधिकाः वृक्षाः अशनिपाततः दग्धाः भवन्ति स्म । तेन छिन्नाः मृताः भवन्ति स्म, अन्ये च पीडिताः रोगग्रस्ताः च । तेषु स्थितः रोगः अन्यत्र न प्रसरेत् इत्यतः ते वृक्षाः नाश्यन्ते स्म । नगरसभीयाः तान् अशनिपाततः रक्षितुं तेषु संवाहकयन्त्रविशेषं योजितवन्तः सन्ति । तानि यन्त्राणि अशनितः आगतम् आघातं धृत्वा भूमिं प्रति प्रेषयन्ति, तेन वृक्षः अक्षतः तिष्ठति । तादृशस्य एकैकस्य यन्त्रस्य मूल्यं ३००० अमेरिकन्-डालरात्मकम् । त्रिंशत्-मीटरौन्नत्ययुतेषु शते वृक्षेषु एतावता तानि यन्त्राणि योजितानि सन्ति ।

स्टेम्सन् उलेलाह् च

एतौ 'ओल्ड्टेस्ट्मेण्ट्'नामके ग्रन्थे निर्दिष्टौ सर्वथा न । एतौ तु लास्एञ्जलीस्नगरस्य वेन्नाय्स्-उपनगरे स्थितौ शुनकौ । तस्मिन् प्रदेशे निवसन्त्या ५८ वर्षीयया बर्बराफेरेरोवर्यया एतत् नाम कृतम् । कदाचित् सा शुनकयोः विलक्षणव्यवहारं दृष्टवती । अन्धं लघुजातीयं कञ्चन शुनकम् उन्नतजातीयः अपरः शुनकः नगरे सर्वत्र आटयति स्म । मार्गक्रमणं कारयति स्म, रक्तदीपे दृष्टे तं स्थगयति स्म च । तयोः व्यवहारः फेरेरोवर्यया परिलक्षितः बहूनि दिनानि यावत् । लघुशुनकः उन्नतशुनकं विधेयतया अनुसरति स्म । यत्र स्थगनीयं भवति तत्र उन्नतशुनकः मुखेन अन्येन अङ्गेन वा लघुशुनकस्य पादे मृदुप्रहारं करोति स्म । 'एतौ पालकरहितौ' इति ज्ञातवती सा वृद्धा तौ स्वगृहं नीत्वा पोषितवती, पूर्वोक्तं नाम दत्तवती च ।

बुद्धिमान् बीरबलः

कदाचित् अकबरस्य आस्थानं प्रचलति स्म । कश्चन आस्थानिकः अग्रे आगत्य अकबरं त्रिवारं प्रणम्य – ''एतत् नूतनं सुगन्धद्रव्यम् इसफहानतः आनीतम् । महाराजः एतस्य उत्कृष्टताविषये स्वाभिप्रायं प्रकटयितुम् अर्हति'' इति उक्त्वा महाराजस्य हस्ते सुगन्धद्रव्यकुपीं स्थापितवान् ।

महाराजः कुपीम् उद्घाट्य दृष्टवान् । तस्य मुखे मन्दहासः उत्पन्नः । सः सभासदः उद्दिश्य – ''मया मिर्-शामसुद्दीनतः कुपी स्वीकृता यत् तत् सर्वैः दृष्टम् एव । भवत्सु कोऽपि किं वक्तुं शक्नुयात् यत् दातुः हस्तः अधः, स्वीकर्तुः हस्तः उपरि च कदा भवति इति ?'' इति उक्त्वा किञ्चित्कालं उत्तरं प्रतीक्षितवान् ।

'मया कुपीदानसमये किमपि अपराद्धं किम् ?' इति भीत्या राजानं दृष्टवान् शामसुद्दीनः । राज्ञः मुखं गम्भीरं लक्षितं तेन । यावत् सः किमपि वक्तुम् उद्युक्तः तावता राजा तम् अपृच्छत् – ''किं भवान् उत्तरं जानाति ?'' इति ।

सभासत्सु परस्परसम्भाषण-ध्वनिः उत्पन्नः । सभायाम् एतादृशानां प्रश्नानाम् उत्पादनं महाराजस्य स्वभावः आसीत् । अद्यतनः प्रश्नः कठिनः इव अभासत । शामसुद्दीनः विना वचनं आसने उपविष्टवान् ।

अपरः सभासत् उत्थितवान् । ''महाराज ! दातुः स्वीकर्तुः वा हस्तः उपरि अधः वा भवति चेदपि फलं तु समानम् एव'' इति उक्तवान् सः । महाराजस्य मुखे हासः उत्पन्नः । सभासदः अपि हसितवन्तः ।

अकबरः सभां परीक्षादृष्ट्या सकृत् दृष्ट्वा - ''भवतु कोऽपि मम प्रश्नस्य उत्तरं न जानाति । बीरबलः क्व ?'' इति अपृच्छत् । अकबरस्य प्रियः आस्थानिकः बीरबलः कुत्र अस्ति इति सर्वे इतस्ततः दृष्टवन्तः ।

''अहम् अत्र अस्मि महाराज !'' इति वदन् सभां प्रविष्टवान् बीरबलः । सर्वेषां दृष्टिः बीरबले संलग्ना । ''बीरबल ! प्रायः भवान् एव मम सन्देहं परिहर्तुं समर्थः'' इति उक्त्वा राजा स्वस्य प्रश्नं पुनः उच्चारितवान् ।

बीरबलः सभासदः आत्मविश्वासेन पश्यन् अकबरसमीपं गतवान् । स्वस्य नस्यपात्रम् उद्घाट्य महाराजस्य पुरतः गृहीतवान् च । महाराजः ततः किञ्चित् नस्यचूर्णं स्वीकृतवान् । तदा बीरबलः हसन् उक्तवान् - ''ज्ञातं खलु ? नस्य-चूर्णस्वीकारसमये दातुः हस्तः भवति अधः, स्वीकर्तुश्च उपरि'' इति ।

भारतीयः साम्प्रदायिकः नृत्यप्रकारः

तालप्रधानं नृत्यम्

षोडशे शतके तरुणः सुसंस्कृतः मालवराजः बाजबहादुरः युद्धे पराजयं प्राप्य विश्रान्त्यर्थं नर्मदाखाते स्थिते 'माण्डु'प्रदेशम् आगतवान् । तत्र सः सुन्दरीं रजपूतराजकुमारीं रूपवती परिणीतवान् । तस्य चिन्तनम् आसीत् यत् सुन्दर्या पत्न्या सह दीर्घकालं यावत् सुखजीवनं यापयिष्यामि इति । किन्तु तथा न जातम् । आगरास्थः राजा अकबरः रूपवत्याः परमसौन्दर्यवार्तां श्रुतवान् । अतः सः ताम् आनेतुं माण्डुदुर्गं प्रति सैन्यं प्रेषितवान् ।

ततः घोरं युद्धं प्रवृत्तम् । बाजबहादुरः पराजयं प्राप्य रणरङ्गतः पलायितवान् । राज्ञी रूपवती शत्रुसैन्यस्य अधीना भवितुं न इच्छति स्म । अतः सा आत्महत्यया प्राणत्यागं कृतवती । अतः महता प्रयत्नेन अपि मोगलसेना रूपवतीं नेतुं न शक्तवती । किन्तु तया सेनया अमूल्यं किञ्चित् नीतम् । तया स्थानीया नाट्यपरम्परा अकबरसमीपं नीता । इतिहासः ज्ञापयति यत् तया सेनया सार्धत्रिशताधिकाः (३५०) नाट्यकाराः माण्डुदुर्गात्, समीपस्थेभ्यः प्रदेशेभ्यः च मोगलराजधानीं प्रति नीताः इति ।

भारतीयः कश्चन नाट्यप्रकारः कथं मोगलास्थानं प्रति गतः इत्येतत् निरूपयति एषा घटना । एतादृश्यः बह्व्यः घटनाः प्रवृत्ताः । एतस्य कारणतः हिन्दुनाट्यप्रकारः मुस्लिम्नाट्यप्रकारः च परस्परं सम्मिलितौ जातौ । एवम् उभयोः नाट्यप्रकारयोः सम्मेलनात् तृतीयस्य 'कथक'नृत्यप्रकारस्य जन्म जातम् ।

अकबरस्य शासनकाले मोगल-रजपूत-शासनयोः मध्ये आदानप्रदानादिकम् आधिक्येन प्रवर्तते स्म । एतस्य कारणतः 'इण्डो-मोगल्'कलापरम्परायाः विकासः जातः । तस्याः एव परम्परायाः कश्चन प्रकारः

'कथक्' ।

देवालयेषु यः साम्प्रदायिकनृत्यप्रकारः भवति स्म सः एव राजास्थानं प्रति यदा गतः तदा 'कथक'रूपेण परिवर्तितः जातः ।

अष्टादशे शतके कथकनृत्यप्रकारः स्वकीयम् एव क्षेत्रं सम्पाद्य विकसितः जातः । एतस्य नाट्यस्य तन्त्राणि, साहित्यम् इत्यादयः रूपिताः जाताः । अतः एतत् नाट्यम् अन्यनाट्येभ्यः पार्थक्येन स्थितिं प्राप्नोत् ।

षोडशशतकस्य आरम्भकाले कथक-नृत्यकाराः सुपिनद्धं 'चूडीदार-पैजामा'वेषं धरन्ति स्म । मोगलचित्रकारैः चित्रितेषु चित्रेषु एतादृशं वेषधारणं स्फुटतया चित्रितं दृश्यते । अनन्तरकाले नृत्यकाराः 'नूपुर'धारणम् अपि आरब्धवन्तः ।

अन्यस्य नृत्यप्रकारस्य कथयनृत्यस्य च प्रमुखः भेदः नाम – अन्ये नृत्यप्रकाराः स्वरं रागं च अवलम्बन्ते चेत् कथकनृत्यं ताल-मात्रम् अवलम्बते । कथकनृत्ये विशिष्टानि सञ्चलनानि, तालानुगुणपदनिक्षेपविधयः च भवन्ति । कथकनृत्यं कृष्णलीलाप्रभृतीः पुराणकथाः, हिन्दुस्तानीसाम्प्रदायिक-सङ्गीतप्रकारं च अवलम्बते एतत् । सारङ्गि-वाद्यं तबलावाद्यं च उपयुज्यते अत्र ।

महाराजः बिन्दादिनूवर्यः, लखनवूनिवासी तदीयसहोदरः कलकः, तयोः शिष्यौ अचन्महाराजः लुच्छुमहाराजः इत्यादयः एतस्य नृत्यप्रकारस्य जनप्रियतासम्पादने विशेषप्रयत्नं कृतवन्तः । बिर्जुमहाराजः शम्भुमहाराजः इत्यादयः अपि एतदर्थं प्रयत्नं कृतवत्सु अन्यतमाः ।

एते अत्र सामान्याः अंशाः

- कथकनृत्यकारः रेखाकारेण भुजौ आनीय यत् सञ्चालयति तत् उच्यते 'कसक्-मसक्' इति । कथकनृत्यकाराः उत्कूर्दनैः संज्ञाभिश्च प्रेक्षकान् मोहयन्ति । नृत्यावसरे क्वचित् ते उभौ अपि पादौ उन्नीय वायौ एव किञ्चित्कालं तिष्ठन्ति । कथकनृत्ये 'चक्कर्' अपि प्रसिद्धं, यत्र च नृत्यकारः भ्रमरिका इव परिभ्रमति । एतत् भ्रमणम् एव नृत्यस्य आकर्षकतां वर्धयति ।
- कथकनृत्ये एकस्मिन् एव, नृत्यकारिणी तालसूचकानि पदानि उच्चारयन्ती तालानुगुणं पादाघातं कुर्वती नृत्यति । एतादृशी व्यवस्था अन्येषु साम्प्रदायिकनृत्येषु न दृश्यते ।

मकरसङ्क्रान्तिः

विशिष्टेषु उत्सवेषु अन्यतमः अस्ति 'मकरसङ्क्रान्ति'-उत्सवः । एषः उत्सवः जनवरीमासे आचर्यते समग्रे भारतदेशे । एतस्मात् दिनात् उत्तरायणस्य आरम्भः भवति । तदा सूर्यः उत्तरदिग्भागम् आश्रयति ।

तद्दिने सूर्यः मकरराशिं प्रविशति इति साम्प्रदायिकाः विश्वसन्ति । सूर्यः दक्षिण-गोलार्धस्य परिक्रमणं समाप्य तस्मिन् दिने उत्तरगोलार्धं प्रविशति ।

उत्तरायणे मृताः जनाः जननमरणचक्रतः मुक्तिं प्राप्नुवन्ति, तेषां पुनर्जन्म न भवति इति काचित् प्रथा अस्ति । अतः एव महाभारते कौरव-पाण्डवयोः युद्धे व्रणितः पराक्रमी वयोवृद्धः भीष्मः उत्तरायणस्य प्रतीक्षां कृतवान् । सः इच्छामरणरूपं वरं प्राप्तवान् आसीत् । अतः सः अर्जुननिर्मितायां शरशय्यायां शयानः प्राणत्यागाय उत्तरायणस्य प्रतीक्षां कुर्वन् आसीत् । मम पुनर्जन्म न भवेत् इति इच्छया एव सः सूर्यस्य मकरराशिप्रवेशं निरीक्षमाणः प्राणान् धरति स्म । सूर्यः यदा मकरराशिं प्रविष्टवान् तदा एव सः स्वस्य अन्तिमश्वासोच्छ्वासं कृतवान् ।

तमिलुनाडुराज्ये

तमिलुप्रान्ते पोङ्गल्-उत्सवः बहुप्राधान्यं भजते । एषः उत्सवः क्षेत्रेषु जातायाः फलसमृद्ध्याः उत्सवः । चतुर्दिनात्मके अस्मिन् उत्सवे मकरसङ्क्रान्तिदिनस्य उत्सवः प्रामुख्यम् आवहति ।

तेषु चतुर्षु दिनेषु प्रथमदिनस्य उत्सवं 'भोगी' इति कथयन्ति । अस्मिन् दिने ग्रामस्य सर्वे भागाः, गृहाणि, गृहपरिसराः च स्वच्छी-क्रियन्ते । प्रातः एव विशालप्रदेशे अग्निं प्रज्वाल्य तत्र पुरातनानि अनावश्यकवस्तूनि दह्यन्ते ।

परेद्यवि पोङ्गल्-उत्सवः । तस्मिन् दिने

ग्रामे कृषकाः नूतनघटान् क्रीत्वा नूतनवस्त्रं धृत्वा उत्सवे भागं गृह्णन्ति । तस्मिन् दिने नूतनतया वर्धितेन तण्डुलेन तत्कालीनशाकेन च पाकं कुर्वन्ति । ग्रामाद् बहिः कुत्रचित् ग्रामस्थाः सर्वे जनाः एकत्र सम्भूय बृहद्घटेषु ओदनं पचन्ति ।

नगरवासिनः अपि साम्प्रदायिकपाकं कुर्वन्ति । तस्मिन् पाके मधुरं भक्ष्यं भवति । एतत् तण्डुलेन गुडेन च मिश्रितं 'चक्करे पोङ्गल्'नाम्ना निर्दिश्यते ।

उत्सवदिने सर्वेषां गृहाणां पुरतः महाकारिका रङ्गवल्ली शोभते । तथैव मुखद्वारम् आम्रपर्णानां तोरणेन अलङ्कृतं भवति । ततः सर्वे सूर्यं पूजयन्ति ।

अनन्तरदिनस्य उत्सवः 'मट्टपोङ्गल्' इति । तद्दिने गोपूजां कृत्वा गवा कृतं कार्यं प्रति आदरं प्रदर्शयन्ति जनाः । गोपालकाः गाः स्नापयित्वा तेषां शृङ्गाणि कण्ठान् च लघुभिः घण्टाभिः अलङ्कुर्वन्ति । गृहजनैः विशेषतया सज्जीकृतं पोङ्गलखाद्यं तद्दिने गोभ्यः दीयते प्रीत्या ।

केषुचित् स्थलेषु अस्मिन् दिने 'जल्लिकट्टु'-नाम्ना प्रसिद्धं वृषभयुद्धं तु वैशिष्ट्यं भजते । वृषभाणां धावनस्पर्धा अपि अस्मिन् दिने आयोज्यते ।

अन्तिमदिनस्य उत्सवः 'कानुम्पोङ्गल्' इति । तद्दिने कुटुम्बजनाः सर्वेऽपि विहारार्थं गच्छन्ति, बन्धुमित्रादिभिः मिलन्ति वा । केषुचित् प्रदेशेषु 'कान्निपोङ्गल्' इति नाम्ना उत्सवः आचर्यते । साम्प्रदायिकवेषधारिण्यः काश्चन युवतयः आगत्य सर्वेषां गृहाणां पुरतः नृत्यन्ति यष्टिक्रीडां 'कुम्मि'नामकं नृत्यविशेषं वा प्रदर्शयन्ति । प्रतिफलरूपेण गृहजनाः ताः धनेन इक्षुदण्डैः च सम्मानयन्ति ।

आन्ध्रप्रदेशे

आन्ध्रप्रदेशे एष उत्सवः तमिलुनाडुवत् एव । अत्रापि मकरसङ्क्रान्तितः पूर्वतनं दिनं 'भोगि' इति आचर्यते । 'भोगि'-उत्सवावसरे गृहेषु वर्णलेपनं, स्वच्छीकरणम्, अलङ्करणं च क्रियते । जनाः तद्दिने उषःकाले एव अग्निं परितः उपविश्य गायन्ति ।

मकरसङ्क्रान्ति-उत्सवः अत्र 'पेद्दपण्डुग'-नाम्ना निर्दिश्यते । 'महान् उत्सवः' इति एतस्य पदस्य अर्थः । अस्मिन् दिने कृषकाः कृषिसमये साहाय्यं दत्तवद्भ्यः सर्वेभ्यः कर्मकरेभ्यः

भूरिभोजनं यच्छन्ति ।

तृतीयदिनस्य उत्सवः 'कनुमु' इति निर्दिश्यते । तद्दिने भूरिभोजनं विश्रान्तिः च अनुभूयते सर्वैः । अस्मिन् अवसरे स्पर्धाः, क्रीडाः, अजयुद्धं, वृषभयुद्धं, कुक्कुटयुद्धं इत्यादयः आयोजिताः भवन्ति ।

आन्ध्रप्रदेशस्य केषुचित् भागेषु उत्सवः एषः 'मुक्कनुमु' इति उत्सवेन सह समाप्तं भवति । एतदवसरे गावः पूज्यन्ते, भोज्यन्ते, शोभायात्रार्थं नीयन्ते च ।

अस्साम्राज्ये

मकरसङ्क्रान्तिकालः अस्सांजनपदीयानाम् कृते उल्लासमयः आनन्दमयः भोजनमयश्च । अत्र एषः उत्सवः 'बिहु' इति, 'भोगाली बिहु' इति वा निर्दिश्यते । 'भोग'पदस्य अर्थस्तु भक्षणं विहरणं च इति ।

'उरुख्' इत्येतत् पौषमासस्य अन्तिमं दिनम् । उत्सवे एतस्य दिनस्य विशेषमहत्त्वम् अस्ति । तस्मिन् दिने पुरुषाः यत्र धान्यलवनं समाप्तं तत्र क्षेत्रे तात्कालिककुटीरं निर्मान्ति । एतत् कुटीरम् उच्यते - 'भेलाघर्' इति । 'मेजी' उत्सवाचरणस्य प्रमुखम् अङ्गम् । चतुर्णां वेणुस्तम्भानां मध्ये काष्ठानां राशिं कृत्वा वेद्याकारः यः निर्मीयते सः उच्यते 'मेजी' इति ।

तस्मिन् दिने महिलाः तण्डुलभक्ष्यम् अन्यानि भक्ष्याणि च निर्मान्ति । आरात्रि ताः 'मेजीं' परितः नृत्यन्त्यः आनन्देन कालयापनं कुर्वन्ति । प्रातः ताः स्नात्वा प्रार्थनां कुर्वन्ति ।

अन्येषु प्रदेशेषु...

भारतस्य इतरभागेषु अपि एषः मकर-सङ्क्रान्त्युत्सवः उल्लासेन आनन्देन धार्मिकरीत्या च आचर्यते । पञ्जाबप्रदेशे एषः उत्सवः कथ्यते 'लोही' इति । ग्रामीणाः स्वक्षेत्रे वर्धितानां धान्यानां पूजादिकेन एतम् उत्सवम् आचरन्ति । ग्रामेषु स्त्रीपुरुषाः अग्निं प्रज्वाल्य तं परितः तत्रत्यं 'भाङ्गा'नामकं जानपदं नृत्यं कुर्वन्ति । स्त्रियः अस्मिन् अवसरे पादेषु हस्तेषु च 'मेहन्दी'रसेन चित्रं विलिख्य उत्सवम् आनन्देन आचरन्ति ।

पश्चिमबङ्गालप्रदेशे स्थितं गङ्गासागरद्वीपं प्रति मकरसङ्क्रान्तिदिने सर्वतः यात्रिकाः आगच्छन्ति । तत्रैव गङ्गानदी पूर्वसमुद्रेण मिलति । 'गङ्गसागरमेला' इत्येतत् एकं पवित्रं कार्यम् इति जनाः भावयन्ति । नदी-सङ्गमस्थाने स्नानं कृतं चेत् सर्वैः पापैः विमुक्तिः भवति एव इति दृढः विश्वासः अस्ति जनानाम् ।

कर्णाटकेषु अपि एषः उत्सवः वैभवेन एव आचर्यते । जनाः वृषभान् धेनूः च सम्यक् अलङ्कृत्य शोभायात्रां कुर्वन्ति । स्त्रीपुरुषाः नूतनवस्त्रं धृत्वा सर्वेभ्यः जनेभ्यः इक्षुदण्डं, तिलेन सहितं गुडं, शुष्कनारिकेलं च वितरन्ति । अस्मिन् अवसरे प्रसिद्धा साम्प्रदायिकी वाताटस्पर्धा अपि आयोजिता भवति क्वचित् ।



गुजरात्प्रदेशे अपि वर्णमयवाताटानाम् उड्डायनम् अस्मिन् मकरसङ्क्रान्त्यवसरे कुर्वन्ति जनाः । अपि च गुजरातप्रदेशे एतम् उत्सवं पवित्रं मन्यन्ते । अतः अस्मिन् अवसरे विद्यार्थिभ्यः विद्यार्थिवेतनं, पारितोषिक-वितरणम् इत्यादयः कार्यक्रमाः आयोज्यन्ते प्रायः ।

केरलेषु अस्मिन् समये 'शबरिमलै'-यात्राकालः । शबरिमलै भगवतः अय्यप्पस्य वासस्थानम् इति प्रसिद्धम् । मकरसङ्क्रान्ति-दिने 'मकरज्योति'नामकं पवित्रज्योतिः तस्य पर्वतस्य शिखरे आदीप्तं भवति प्रतिवर्षम् अपि ।

एवं मकरसङ्क्रान्त्युत्सवस्य आचरणं देशे विभिन्नप्रदेशेषु विभिन्नतया क्रियते । किन्तु सर्वत्र आचरणे एकसूत्रता अस्ति इति तु सत्यमेव । यथा दीपावली दीपानाम् उत्सवः तथा सङ्क्रान्तिः धान्यस्य उत्सवः । अस्मिन् अवसरे वयं 'सर्वेषां समृद्धिः सुखं च भवतु' इति आशास्महे ।

तमिलुनाडीया जानपदकथा

'तमिलुनाडु 'शब्दस्य श्रवणस्य अनुक्षणम् अस्माकं मनःपटले काञ्चीपुरीयशाटिकाः, इड्लिदोसाखाद्यानि, कर्णाटकसङ्गीतं, भरतनाट्यं, देवालयाः इत्यादीनां चित्राणि प्रादुर्भवन्ति । क्रिस्तात् पूर्वमेव तमिलुनाडुराज्ये राजप्रशासनम् आसीत् । तमिलुभाषा अपि प्राचीनभारतीयभाषासु अन्यतमा ।

तमिलुनाडुराज्यस्य उत्तरदिशि कर्णाटकराज्यम् आन्ध्रप्रदेशः च स्तः । पश्चिमायां केरलराज्यम् अस्ति । पूर्वस्यां दक्षिणस्यां च पूर्वसमुद्रः हिन्दूमहासागरश्च स्तः । अस्य राज्यस्य दक्षिणस्याः दिशः कोणे कन्याकुमारी अस्ति । अत्रैव भारतस्य सीमा परिसमाप्ता भवति ।

पूर्वपश्चिमघट्टयोः मेलनम् अस्मिन् राज्ये एव भवति । तत्कारणतः ऊटि, कोडैकेनाल, एर्काड्, कोट्टगिरि इत्यादयः रमणीयाः पर्वतप्रदेशाः एतस्मिन् राज्ये विराजन्ते विशेषतः ।

तमिलुनाडुराज्यस्य विस्तीर्णं १३००५८ चतुरस्रकिलोमीटरात्मकम् अस्ति । जनसंख्या च ६२,११०,८३९ मिता अस्ति । एतत् राज्यं विस्तीर्णेन एकादशं स्थानम् अर्हति देशे ।

निर्धनस्य पाथेयस्य फलम्

पुलियम्पट्टी इति कश्चन लघुग्रामः । तत्र मुरुगः सेल्वी चेति दम्पती वसतः । मुरुगः दरिद्रः । जीवनार्थं क्षेत्रम्, अन्यत् कार्यं किमपि वा न आसीत् तस्य । तस्य पत्नी जीवननिर्वहणाय बहु कष्टम् अनुभवति स्म ।

कदाचित् सा अत्र उपजीविकानिर्वहणं कष्टसाध्यम् इति विचिन्त्य पतिम् उक्तवती – ''भवान् कुत्रापि कार्यं कृत्वा धनसम्पादनं न करोति चेत् अहं मम मातृगृहं गमिष्यामि'' इति ।

ततः सा अन्तः गत्वा गतदिनस्य यत् अवशिष्टम् अन्नम् आसीत् तत् जलेन सिक्त्वा तेन सह लवणयुक्तं जलमयं तक्रं संयोज्य, एकां हरितमरीचिकां च तदुपरि संस्थाप्य पाथेयं सज्जीकृत्य तत् आनीय पत्युः हस्ते दत्त्वा अवदत् – ''इदानीं नगरं गच्छतु । कमपि उद्योगम् अन्विष्यतु । उद्योगं विना धनं विना च मह्यं मुखं मा दर्शयतु । भवते अहम् गृहे अवशिष्टं सर्वमपि अन्नं दत्तवती अस्मि'' इति ।

मुरुगः पद्भ्याम् एव अतीवदुःखेन नगरं प्रति प्रस्थितः । उष्णकालः सः । एक-घण्टानन्तरं सः कस्यचित् महतः तिन्त्रिणीवृक्षस्य समीपम् आगतवान् ।

तं वृक्षं दृष्ट्वा सः मुरुगः 'अत्र किञ्चित् विश्रान्तिं स्वीकरोमि । तदनन्तरं मध्याह्ने पत्न्या दत्तं पाथेयं खादामि' इति विचिन्त्य तत् पाथेयम् एकस्यां शाखायां सम्यक् बद्ध्वा वृक्षस्य अधः शयानः शीघ्रमेव निद्रां प्राप्तवान् ।

तस्मिन् तिन्त्रिणीवृक्षे कश्चन ब्रह्मराक्षसः वसति स्म । सः ब्रह्मराक्षसः मुरुगेण महत्या जागरूकतया बद्धं तत् पाथेयम् दृष्ट्वा आश्चर्यचकितः । तस्य स्वभावः आसीत् यत् कुतूहलशमनपर्यन्तं सः तस्मात् विरतः न भवति स्म । अतः सः तां शाखाम् आगत्य तत् पाथेयम् उद्घाटितवान् । तस्य पाथेयस्य गन्धेन सः आकृष्टः अभवत् ।

'अहो, अपूर्वः गन्धः ! कीदृशः आहारः स्यात् एषः ! कदापि मया एतादृशः गन्धः न आघ्रातः' इति चिन्तयन् सः ब्रह्मराक्षसः मुष्टिमितं तक्रान्नं हरितमरीचिकया सह खादितवान् । बहु रुचिकरम् आसीत् तत् ।

अतः सः पुनः पुनः तत् अन्नं खादितवान् । तेन तत्र अन्नं सर्वथा समाप्तम् एव ।

एतस्मात् सः लज्जितः जातः । 'एषः दरिद्रः उत्थानानन्तरं बुभुक्षितः सन् किं खादेत्' इति चिन्तयन् सः नितरां खिन्नः । अतः सः तक्रान्नयुक्ते तस्मिन् ग्रन्थौ एकं कांस्यपात्रं स्थापितवान् । तत् पात्रं दिव्यया शक्त्या युक्तम् आसीत् । 'एतत् एतस्य शुभं करोतु' इति मुरुगं पश्यन् उक्त्वा सः ब्रह्मराक्षसः ततः अदृश्यः जातः ।

किञ्चित्कालानन्तरं मुरुगः उत्थितः । सः नितरां श्रान्तः बुभुक्षितः च आसीत् । सः आत्मना वृक्षशाखायां बद्धं पाथेयं कुतूहलेन दृष्टवान् । तत्र आहारः न आसीत् । एतत् ज्ञात्वा सः बहु दुःखितः अभवत् । पाथेयपात्रे एकं प्रकाशमानं पात्रं सः दृष्टवान् । किन्तु तत् पात्रं दिव्यशक्तियुक्तम् इति सः न जानाति स्म ।

उत्सवाः

पोङ्गल्-उत्सवः अत्र धान्यवर्धनसमये क्रियमाणः प्रमुखः उत्सवः । जनवरीमासे क्रियमाणः एषः उत्सवः चत्वारि दिनानि यावत् प्रचलति । वृषभयुद्धं(जाल्लिकट्टु) अस्य उत्सवस्य कश्चन प्रमुखः भागः । एषा क्रीडा ग्रामेषु नगरेषु चापि प्रचलति ।

एप्रिल्मासे मधुरैनगरे चितिरै-उत्सवस्य आचरणं भवति । एष उत्सवः भगवतः सुन्दरेश्वरस्य, पाण्ड्यराजकुमार्याः मीनाक्ष्याः च विवाहदिनत्वेन आचर्यते ।

चिदम्बरक्षेत्रे मामल्लपुरक्षेत्रे च नटराजस्य पुरतः सांस्कृतिकोत्सवः प्रचलति, यस्य च अङ्गतया नृत्योत्सवः अपि प्रचलति । उत्सवसमये राज्यस्य उत्तमाः नर्तकाः द्रष्टुं शक्याः मामल्लपुरे महाबलिपुरे च । त्रयोदशे शतके पल्लवराजैः निर्मितानाम् अत्यपूर्वशिलाशिल्पानां पुरतः निर्मिते अनावृतनृत्यमण्डपे एषः नृत्योत्सवः प्रचलति ।

चिदम्बरे नृत्यकाराणां सर्वेषाम् अधिपतेः नटराजस्य पुरतः एव नृत्योत्सवः प्रचलति । तत्र नर्तकाः स्वीयं नृत्यं देवाय नटराजाय समर्पयन्ति । अस्य देवालयस्य स्तम्भेषु भरतनाट्यस्य १०८ भङ्ग्यः शिल्पिभिः उत्कीर्णाः सन्ति । भरतनाट्यं तमिलुनाडुराज्यस्य शास्त्रीयं नृत्यम् ।

सः तत् पात्रं कोपेन ताडितवान् । तत् पात्रं शब्दम् अकरोत् । तत्क्षणे एव काचन देवता प्रत्यक्षीभूय तस्य पुरतः रुचिकरं भोजनं स्थापितवती । मुरुगः आश्चर्यचकितः । किन्तु सः महत्या बुभुक्षया पीडितः आसीत् इत्यतः 'एतत् कुतः आगतं, कः किमर्थं स्थापितवान्' इत्यादिकम् अचिन्तयन् सर्वं वेगेन खादितवान् एव ।

तस्य भोजनं समाप्तम् । अनन्तरक्षणे एव सर्वं स्वच्छम् अपि अभवत् । पूर्ववदेव तस्य पुरतः तत् पात्रम् आसीत् । मुरुगः तु पूर्णोदरः तृप्तः च । सः तत् पात्रं स्वीकृत्य आनन्देन गृहं प्रति धावितवान् ।

तस्य पत्नी सेल्वी तं दृष्ट्वा असन्तुष्टा । सा जानाति स्म यत् पतिः कमपि उद्योगं न प्राप्तवान् इति । अतः सा कोपेन पतिं बहुधा तर्जितवती । तदा मुरुगः क्रोधेन - ''मुखं मा उद्घाटयतु रे'' इति पत्नीं भर्त्सितवान् । तस्य उग्ररूपं दृष्ट्वा भीता सेल्वी मुखस्य पिधानम् अपि विस्मृतवती । ततः मुरुगः तत् कांस्यपात्रं

आदरेण 'आगच्छन्तु, आगच्छन्तु' इति वदन्तौ स्वागतीकृतवन्तौ ।

कौशेयवस्त्रं धृत्वा तौ कदलीपत्रस्य पार्श्वे स्थापितं रजतपात्रं जलेन पूरितवन्तौ । आगताः अतिथयः सर्वे भोजनाय उपविष्टाः । सर्वेषां पुरतः उष्णं रुचिकरं भोजनम् आगतम् । भोजने विविधानि भक्ष्यभोज्यानि, व्यञ्जन-पर्पटादीनि, क्वथितसारादीनि, पायस-लड्डुकादीनि च आसन् । सर्वे सन्तोषेण आतृप्ति भोजनं कृतवन्तः ।

एतत् भोजनं ग्रामे सर्वत्र चर्चाविषयः अभवत् । तस्मिन् पुलियम्पट्टिग्रामे कश्चन

कुटीरमध्ये संस्थाप्य तत् सकृत् ताडितवान् । ''आवयोः कृते आहारं ददातु'' इति उक्तवान् च । तदा काचन देवता आगत्य तयोः कृते रुचिकरम् आहारं दत्तवती ।

ततः मुरुगः आत्मना कथं तत् पात्रं प्राप्तम् इति उक्त्वा तत् पात्रं तस्यै दत्तवान् ।

तौ दम्पती चिन्तितवन्तौ - 'देवः अस्मान् अनुगृहीतवान् । अतः वयम् अनेन दरिद्रेभ्यः प्रतिदिनम् आहारं दद्मः' इति ।

सेल्वी उक्तवती - ''सर्वेभ्यः ग्रामीणेभ्यः अपि भोजनं दद्मः'' इति ।

परेद्यवि मुरुगः सेल्वी च प्रतिगृहं गत्वा सर्वान् भोजनार्थम् आहूतवन्तौ । एतौ दरिद्रदम्पती कथम् एतावत् धनं प्राप्तवन्तौ इति कुतूहलेन उत्तमभोजनेच्छया च ग्रामीणाः तयोः गृहम् आगतवन्तः । यदा तत् गृहं प्राप्तं तदा तु तेषाम् इतोऽपि आश्चर्यम् अभवत् । यतः तत्र भोजनपदार्थाः सर्वे सिद्धाः एव आसन् । द्वारस्य पुरतः स्थितौ दम्पती सर्वान्

कौशेयवस्त्रनिर्माणम्

तमिळुनाडुराज्ये निर्मीयमाणाः शाटिकाः जगति एव सुविख्याताः । एताः काञ्चीपुरे निर्मीयन्ते । शुद्धकौशेयेन निर्मीयन्ते एताः । नयनमनोहरः वर्णः, वयनोत्कृष्टता, दीर्घ-जीविता इत्यादीनि एतासां वैशिष्ट्यानि । एतासु शाटिकासु सुवर्णतन्तवः (झरी) अपि योज्यन्ते । काञ्चीपुरीयः कौशेयवस्त्र-निर्माणोद्यमः चतुश्शतवर्षेभ्यः पूर्वम् एव आरब्धः ।

धनिकः आसीत् । सः अस्मिन् भोजनकार्यक्रमे न उपस्थितः । किन्तु कुतूहलम् असूया तस्मिन् प्रविष्टे । कदाचित् सः मुरुगस्य गृहं गत्वा तत्रत्यं रहस्यं ज्ञातवान् । ततः सोऽपि तथैव कर्तुं निश्चित्य पत्नीं पाथेयं सिद्धं कर्तुम् उक्तवान् । सा वैविध्यमयं पाकं कृत्वा अनेकेषु पात्रेषु संस्थाप्य दत्तवती । तत् स्वीकृत्य सः धनिकः ब्रह्मराक्षसस्य वासस्थानम् अगच्छत् ।

तत्र सः दीर्घकालं यावत् ब्रह्मराक्षसस्य प्रतीक्षां कृतवान् । किन्तु राक्षसः तेन न दृष्टः । दीर्घकालिकप्रतीक्षया तस्य तत्र नीरसता जाता । अतः सः - "भोः मूर्ख ब्रह्मराक्षस ! कुत्र गतः भवान् ? किमर्थम् एतावान् विलम्बः ?" इति उच्चस्वरेण अपृच्छत् ।

ब्रह्मराक्षसेन एतत् श्रुतम् । 'एतं नीतिं

देवालयाः

तमिळुनाडुराज्यीयाः देवालयाः सुप्रसिद्धाः । तञ्जावूरुनगरस्थः बृहदीश्वर-देवालयः स्वस्य शिल्पवैशिष्ट्येन विराजते । एषः देवालयः प्रथमेन राजराजचोलेन (क्रि. श. ९८५-१०१३) निर्मापितम् । एतस्य गोपुरे स्थिता शिल्पयुक्ता काचित् कृष्णशिला तथा योजिता अस्ति यत् तस्याः छाया कदापि भूमौ न पतति ।

मधुरैनगरस्थः मीनाक्षीसुन्दरेश्वरदेवालयः अपरः सुप्रसिद्धः देवालयः । अत्र भगवान् शिवः मीनाक्षी च आराध्यदेवौ ।

काञ्चीपुरस्य एकाम्बरेश्वरदेवालये भगवान् शिवः पूज्यते, यश्च पञ्चभूतेषु अन्यतमं पृथिवीतत्त्वम् अत्र पूजितवान् ।

श्रीरङ्गे स्थितः श्रीरङ्गनाथदेवालयः, कुम्भकोण-रामेश्वर-चिदम्बरादिषु तत्परिसरे च स्थिताः देवालयाः चापि दर्शनयोग्याः सन्ति ।

बोधयिष्यामि' इति अचिन्तयत् सः । अतः यदा धनिकः निद्रावशं गतः तदा ब्रह्मराक्षसः तेन आनीतानि आहारपात्राणि अपनीय तस्मिन् स्थाने एकं वेत्रकण्डोलं स्थापयित्वा - 'एषः कण्डोलः यथायोग्यं करिष्यति' इति स्वगतम् उक्त्वा ततः अदृश्यतां गतः ।

धनिकः जागरितः सन् परितः दृष्टिं प्रसारितवान् । यदा कण्डोलः दृष्टः तदा सः आश्चर्यचकितः सन्तुष्टः च । 'मुरुगः यादृशम् आहारं नीतवान् आसीत् ततोऽपि उत्कृष्टम् आहारम् अहम् आनीतवान् आसम् । अतः एषः कण्डोलः मम महोपकारम् एव कुर्यात्' इति चिन्तयन् सः गृहं प्रतिगतः ।

अनन्तरदिने सः मित्रबान्धवान् भोजनार्थं निमन्त्रितवान् । यदा सर्वे उपस्थिताः तदा सः आत्मविश्वासेन कण्डोलं प्रार्थितवान् - ''अतिथिभ्यः दातुम् उत्कृष्टम् आहारं ददातु'' इति ।

अनन्तरक्षणे एव चत्वारः बलशालिनः

श्मश्रुधारिणः पुरुषाः कण्डोलतः उत्थिताः । ते धनिकं तस्य मित्रबान्धवान् च गृहीत्वा शिरः मुण्डयित्वा निराहारम् एव तान् गृहं प्रति प्रेषितवन्तः ।

'अहो ! अहं मुण्डितशिरस्कः अभवम् । मम मानः अपि अपगतः' इति विलपितवान् धनिकः ।

एषः 'भोजोत्सवः' ग्रामीणानां वार्ताविषयः जातः । एतस्मात् उत्थितायाः लज्जातः आत्मानं रक्षितुं धनिकेन दीर्घप्रवासः करणीयः अभवत् ।

प्रवासकेन्द्राणि

तमिळुनाडुराज्ये सर्वत्र मन्दिराणि एव सन्ति । तानि अतिरिच्यापि बहूनि दर्शनयोग्यस्थलानि सन्ति अत्र । तेषु अन्यतमम् अस्ति 'मरीनाबीच्' । एतत् तमिळुनाडु-राजधान्यां चेन्नैनगरे अस्ति । जगति एव दैर्घ्येण द्वितीयम् एतत् । एतस्मिन् समुद्रतीरे प्रयाणिकानां चित्तम् आक्रष्टुं समर्थानि अन्यानि अपि विश्रान्तिस्थानानि सन्ति बहूनि ।

तमिळुनाडु-कर्णाटकसीमायां स्थितः 'होगेनक्कल्'जलपातः एतद्वज्यीयम् अपरम् आकर्षणम् । कावेरीनदी द्विधा विभक्ता भवति अत्र । तस्याः एकः प्रवाहः नदीरूपेण अनुवर्तते । अपरश्च जलपातम् उत्पादयति ।

कावेरीनदी पर्वतादिषु अपि प्रवहन्ती औषधीयसस्यानां मूलेषु स्थितं सारम् आत्मना सह वहति इत्यतः एतस्यां नद्यां स्नानम् आरोग्य-वर्धकत्वेन परिगण्यते ।

भारतम् अवगम्यताम्

प्रश्नोत्तरम्

अपरः गणराज्योत्सवः उपस्थितः अस्ति । ५१ तमः गणराज्योत्सवः अस्माभिः आचर्यते वर्षस्यास्य (२००२) जनवरीमासस्य २६ तमे दिनाङ्के । भारतं स्वतन्त्रं गणराज्यं जातं यत् तत् निमित्तीकृत्य एषः उत्सवः आचर्यते । विदेशीयान् विरुद्ध्य कृतस्य स्वातन्त्र्यसङ्ग्रामस्य फलरूपेण प्राप्तम् एतत् । एतस्य मासस्य प्रश्नाः भारतस्य स्वातन्त्र्यसङ्ग्रामम् अवलम्ब्य भवन्ति । गतवर्षस्य जनवरी-एप्रिल्-मासयोः मध्यकाले प्रकाशितं 'विंशतितमे शतके भारतम्' इत्येतं विभागं ये परिशीलितवन्तः ते तु विनायासम् उत्तरं लेखितुम् अर्हन्ति ।

१. 'दि इण्डियन् स्ट्रगल्'नामकस्य पुस्तकस्य रचयिता कः ?
२. 'सत्याग्रह'नामकं पदं केन ऐदम्प्राथम्येन प्रयुक्तम् ?
३. जवहरलालनेहरू महात्मगान्धिवर्येण कदा कुत्र ऐदम्प्राथम्येन मिलितवान् ?
४. त्रयः राष्ट्रियनायकाः निर्दिश्यन्ते - लाल्, बाल्, पाल् इति शब्दैः । तेषां पूर्णं नाम किम् ?
५. बङ्गालराज्यस्य विभागः कदा अभवत् ?
६. कदा 'ईस्ट् इण्डिया कम्पनी'नामिकया संस्थया अधिकारः आंङ्लसर्वकाराधीनीकृतः ?
७. भारतस्वातन्त्र्यविधेयकं कदा अङ्गीकृतं भारतीयराष्ट्रियकाङ्ग्रेस्संस्थया ?
८. 'सैमन्कमीशन्' भारतं प्रति कदा आगच्छत् ? तस्य उद्देशश्च कः आसीत् ?
९. कदा आन्तरिकसर्वकारः आरचितः ?
१०. 'स्वातन्त्र्यं मम जन्मसिद्धः अधिकारः । तम् अहं प्राप्स्यामि एव' इति वचनं कः कदा उदीरितवान् ?

(उत्तराणि अग्रिमे मासे)

'डिसेम्बर्'मासस्य प्रश्नानाम् उत्तराणि

१. २००० तमवर्षस्य मेमासस्य ११ दिनाङ्के । शतकोटितमशिशोः नाम अस्ति - 'आस्था' इति ।
२. काञ्चनुजुङ्गा इति । तस्य औन्नत्यं - ८, ५९८ मीटर्/२०,२०८ फुट्
३. सिन्धुः, झेलम्, चनाब्, रावी, सतलेज् च ।
४. उत्तराञ्चलं, छत्तीसगढः, झारखण्डः च । तेषां राजधानी च क्रमेण - डेहराडून्, रायपुरं, राञ्ची च ।
५. तमिळुनाडु इति । तयोः नाम श्रीमती जानकी रामचन्द्रन्, श्रीमती जे. जयललिता चेति ।

भारत-गौरव-गाथा

महासंस्कृत्याः स्थूलदर्शनम्, प्रतियुगं सत्यान्वेषणार्थं कृताः विशेषयत्नाः

२४. कालिदासीया मोहकरम्यता

"तात ! अस्माकं वार्षिकोत्सवस्य निमित्तं वयं कालिदासस्य किञ्चन नाटकम् अभिनयन्तः स्मः । श्वः सोमवासरे अस्माभिः सर्वैः सभामण्डपे मेलनीयम् । तत्र अस्माकम् अध्यापकः प्रायः पात्रवितरणं करिष्यति" इति देवनाथवर्यं सोत्साहम् उक्तवान्, विद्यालयात् प्रत्यागतः सन्दीपः ।

"भवद्भिः अभिनीयमानम् 'अभिज्ञान-शाकुन्तल'नाटकं स्यात् खलु ?" इति पृष्टवान् देवनाथवर्यः ।

"सत्यम् । किन्तु भवता कथं तत् ऊहितम् ?" इति पृष्टवान् सन्दीपः ।

"तत् तु तस्य नाटकस्य श्रेष्ठताकारणतः । कालिदासेन विक्रमोर्वशीयं मालविकाग्निमित्रं चेति अपरं नाटकद्वयं यद्यपि लिखितं, किन्तु तत् उभयम् अपि यदा रङ्गे अभिनीयते तदा उभयस्यापि मूलसौन्दर्यम् अपगच्छति प्रायः । भवन्तः शाकुन्तलनाटकं संस्कृतमयम् एव अभिनयन्ति, उत ..... ?"

"न । वयं संस्कृतेन अभिनयन्तः न स्मः ।"

"किमर्थं तथा ? संस्कृतभाषया तस्य नाटकस्य प्रदर्शने का आपत्तिः भवताम् ?"

"संस्कृतं कठिनम् ।"

अनुवर्तमाना कथामाला

"एषः असमीचीनः अभिप्रायः वत्स ! संस्कृतशिक्षणार्थं यः क्रमः आश्रितः आसीत् तस्य कारणतः एतादृशः भावः उत्पन्नः स्यात् लोके । किन्तु, अद्य संस्कृतपाठनार्थं सन्ति अनेकाः आकर्षिकाः आधुनिकपद्धतयः । अतः संस्कृतस्य मूलसौन्दर्यस्य आस्वादने न कोऽपि क्लेशः । आस्तां तावत् । तस्मिन् नाटके किं पात्रं स्यात् भवतः ?"

"अहं न जानामि । श्वः तत् निश्चितं भविष्यति । किं भवान् तस्य नाटकस्य कथां सङ्क्षेपेण श्रावयितुं शक्नुयात्, येन अहं पात्रचयने समर्थः स्याम् ?"

"पात्रं चेतव्यं किम् अस्ति तत्र ? विदूषकस्य ग्राम्यजनस्य वा पात्रं किमपि स्यादेव नाटके । तदेव पात्रं दीयेत भवते" इति उक्तवती चमेली शालातः प्रत्यागच्छन्ती एव ।

"अये, महाप्राज्ञा भवती शाकुन्तल-नाटकस्य कथां जानाति एव खलु ? अतः पितामहेन श्रावयिष्यमाणा कथा भवत्या श्रोतव्या नास्ति । अतः गच्छतु इतः । अहम् एकः एव तां श्रोष्यामि" इति भगिनीम् उपहासपूर्वकम् उक्तवान् सन्दीपः ।

"इदानीं भवन्तौ उभौ अपि इतः गत्वा शालासमवस्त्रं परिवर्त्य पाणिपादं प्रक्षाल्य अल्पाहारं सेवित्वा आगच्छताम् । केचन अतिथयः आगत्य निरन्तरसम्भाषणादिना पितामहे नीरसतां जनितवन्तः अद्य । अतः इदानीं सः किञ्चित् विश्रान्तिसुखम् अनुभवतु नाम" इति उक्तवती तत्र आगता जयश्रीः ।

"एतत् अनुमोद्यते मया" इति उक्तवान् देवनाथवर्यः ।

उभौ अपि बालौ ततः धावित्वा शाला-स्यूतम् एकत्र स्थापितवन्तौ, अर्धघण्टाभ्यन्तरे प्रत्यागतौ च ।

देवनाथवर्यः नेत्रे निमील्य उपविश्य कथानिरूपणक्रमं चिन्तयन् आसीत् ।

"आर्य ! कथाकथनं भवतः पीडायै न भवति खलु ?" इति पृष्टवती जयश्रीः ।

"न कदाचिदपि । कथाकथनम् एव वस्तुतः सुखदायकम्" इति हसन् उक्तवान् देवनाथवर्यः ।

ततः तेन कथा आरब्धा –

"पूर्वं राजा दुश्यन्तः हस्तिनापुरं पालयति स्म । सः कदाचित् मृगयार्थम् अरण्यं गतवान् । तत्र कञ्चित् हरिणम् अनुसरन् सः कण्वाश्रमसमीपम् आगतवान् । तदवसरे

विश्वामित्रमेनकयोः पुत्री, कण्वेन पालिता शकुन्तला केनचित् भ्रमरेण पीड्यमाना आसीत् उद्याने । तदा तस्याः सखी सविनोदं वदति – 'दुश्यन्ते शासति कथम् अबलां पीडयितुम् एतेन धैर्यं प्राप्तम्' इति ।

काकतालीयतया तत्र उपस्थितः दुष्यन्तः एव शकुन्तलां दुष्टभ्रमरतः रक्षितुम् उत्सुकः आसीत् ।

कण्वः आश्रमे न आसीत् । अतः शकुन्तला एव अतिथिसत्कारभारं निरूढ-वती । मृगयातः श्रान्तः राजा विश्रान्त्यर्थम् आश्रमे निवसति । तस्मात् प्रदेशात् हिंस्त्रपशूनां दानवसमूहस्य च निवारणे सः उद्युक्तः भवति । अल्पे एव काले शकुन्तलादुश्यन्तौ परस्परानुरक्तौ भवतः । गान्धर्वविधिना तयोः विवाहः प्रचलति अपि ।

मुद्राङ्गुलीयकं शकुन्तलायै दत्त्वा राजा प्रतिगच्छति । कण्वः आश्रमे न आसीत् इत्यतः ताम् आत्मना सह न नयति सः ।

एकस्मिन् दिने शकुन्तला दुश्यन्तम् एव ध्यायन्ती उपविष्टा आसीत् । तदा शीघ्रकोपी दुर्वासाः तत्र उपस्थितः भवति । शकुन्तला एतत् न परिलक्षते । स्वस्य सत्कारे जातम् अनादरं दृष्ट्वा कुपितः दुर्वासाः – 'यं भवती ध्यायन्ती अस्ति सः भवतीं विस्मृतवान् भवतु' इति शापं ददाति ।

शकुन्तला शापवचनम् अपि न शृणोति । किन्तु तस्याः सखी शृणोति । तस्याः प्रार्थनानुसारं मुनिः – 'यदा सः अभिज्ञापकं किमपि द्रक्ष्यति तदा शापविमोचनं भविष्यति' इति उक्त्वा ततः निर्गच्छति ।

आश्रमं प्रत्यागतः कण्वः शकुन्तलायाः परिणयविचारं जानाति । 'योग्यः एव वरः चितः तया' इति सः सन्तुष्टः भवति ।

अत्रान्तरे शकुन्तला गर्भवती भवति । कण्वः तां पतिगृहं प्रति प्रेषयति ।

राजास्थाने राजा शापकारणतः शकुन्तलां पत्नीत्वेन न अभिजानाति । तेन दत्तं मुद्राङ्गुलीयकं नौकायाम् उपविश्य विहार-समये लीलया यः हस्तसञ्चारः कृतः तत्कारणतः जले पतितम् आसीत् । एतत् न जानाति स्म शकुन्तला । अतः अभिज्ञापक-रूपेण राज्ञे किमपि दर्शयितुम् अशक्ता जाता सा । अतः राजा तां तिरस्करोति ।

राज्ञा तिरस्कृतां शकुन्तलां माता मेनका पोषयति । शकुन्तला अरण्ये पुत्रं प्रसूतवती ।

कदाचित् कश्चन धीवरः कस्यचित् मीनस्य उदरे एकम् अङ्गुलीयकं प्राप्नोति । तत् राज्ञे अर्पयति सः । तत् दृष्ट्वा राजा शकुन्तला-परिणयादिवृत्तान्तं स्मरति । किन्तु शकुन्तला न प्राप्यते । शकुन्तलाविषये यत् अनुचितम् आचरितं तत् स्मरन् खेदेन एव दिनानि यापयति राजा ।

कदाचित् सः कश्यपाश्रमं गच्छति । तत्र कश्चन बालः सिंहशिशुभिः सह क्रीडन् आसीत् । सः बालः एव दुष्यन्तस्य पुत्रः । ततः दुष्यन्तशकुन्तलयोः मेलनं भवति । तौ सुखेन कालं यापयतः ।

तयोः पुत्रः भरतः गच्छता कालेन राजा भविष्यति । सः श्रेष्ठः राजा । तस्य कारणतः एव अस्माकं देशस्य नाम 'भारतम्' इति जातम् ।''

एवं कथाम् उक्त्वा देवनाथवर्यः पुनः अवदत् - ''शाकुन्तलविषये श्रेष्ठः जर्मन्कविः किम् उक्तवान् इति किं भवन्तः जानन्ति ? सः वदति -

यौवनकुसुमस्य रसं रसयितुं
प्रौढवयसः फलस्य रुचिम् आस्वादयितुम्
रम्यतां मान्त्रिकाकर्षणं च वीक्षितुम्
मर्त्यस्वर्गयोः वर्णनम् एकपदेनैव कृतं द्रष्टुं
पठ्यतां शाकुन्तलं, यदेतान् सर्वान् तर्पयति
युगपदेव'' इति ।



देवीभागवतम्

रम्भकरम्भौ दानवपुत्रौ । तयोः अपत्यं न आसीत् । अतः तौ दीर्घकालं तपसि मग्नौ जातौ । करम्भः पञ्चनदीतीर्थे निमज्ज्य तपः कृतवान् । रम्भः एकस्य वृक्षस्य उपरि उपविश्य तपः कृतवान् । इन्द्रः मकररूपं प्राप्य नदीं प्रविश्य करम्भस्य संहारं कृतवान् । भ्रातुः संहारवार्तां श्रुत्वा रम्भः नितरां क्रुद्धः । सः स्वस्य शिरः कर्तयित्वा अग्नये समर्पयितुम् उद्युक्तः जातः ।

यदा सः शिरः कर्तयितुं खड्गम् उन्नीतवान् तदा अग्निः प्रत्यक्षः भूत्वा - ''किमर्थम् आत्महत्यार्थं प्रयत्नः क्रियते ? एतस्मात् कः लाभः ? भवतः तपसा अहं प्रसन्नोऽस्मि । कः वरः दातव्यः मया ?'' इति अपृच्छत् ।

''देव ! यदि मयि भवान् प्रसन्नः अस्ति तर्हि अजेयं पुत्रं ददातु । देवाः दानवाः वा यं जेतुं न शक्नुयुः तादृशं पुत्रं ददातु'' इति प्रार्थितवान् रम्भः ।

''भवतः इच्छा पूर्णा भविष्यति'' इति उक्त्वा अग्निः अदृश्यः जातः ।

रम्भः यदा प्रत्यागच्छन् आसीत् तदा मध्येमार्गम् एकस्मिन् सुन्दरे प्रदेशे एका महिषी तेन दृष्टा । स च प्रदेशः यक्षाणाम् अधीनः आसीत् । सा महिषी तम् अनुसृत्य पातालम् अपि आगतवती ।

पाताले कश्चन महिषः तां महिषीम् अनुसृतवान् । एतस्मात् रम्भः कुपितः । सः तं महिषं सम्यक् ताडितवान् । एतेन कुपितः महिषः शृङ्गाभ्यां रम्भम् उन्नीय भूमौ अपातयत् । रम्भः मृतः जातः । रम्भस्य मरणं दृष्ट्वा महिषी परमदुःखेन अग्निप्रवेशं कृतवती । तदा तस्मात् अग्निकुण्डात् उभौ

राक्षसौ उत्पन्नौ – महिषासुरः रक्तबीजः चेति ।

राक्षसाः महिषासुरं स्वस्य राजानं कृतवन्तः । महिषासुरः काञ्चनपर्वते घोरां तपस्यां कृतवान् । तेन सन्तुष्टः ब्रह्मा तस्य पुरतः प्रत्यक्षः जातः । महिषासुरः ब्रह्माणम् अयाचत – ''मम मृत्युः एव यथा न भवेत् तथा वरं ददातु'' इति ।

तदा ब्रह्मा उक्तवान् – ''जन्म यथा निश्चितं तथैव मरणम् अपि निश्चितम् एव सर्वेषाम् । एवं स्थिते अमरत्वरूपं वरम् अहं कथं वा दद्याम् ? अन्यं कमपि वरं याचतु । भवतः इच्छाम् अवश्यं पूरयिष्यामि'' इति ।

एतत् श्रुत्वा महिषासुरः अवदत् – ''काऽपि स्त्री मादृशं वीरं मारयितुं नार्हति । अतः देवदानवमानवेषु कोऽपि मां मारयितुं यथा न शक्नुयात् तथा वरं ददातु '' इति ।

''अस्तु तावत् । किन्तु स्मरतु – कापि स्त्री एव भवतः संहारं करिष्यति'' इति उक्त्वा ब्रह्मा अदृश्यतां गतः ।

एतं वरं प्राप्य महिषासुरः मदोन्मत्तः जातः । कोऽपि पुरुषः मां मारयितुं न अर्हति इति सः जानाति स्म । अतः सः स्वर्गम् एव वशीकर्तुं सन्नद्धः अभवत् । सः कञ्चित् दूतम् आहूय असूचयत् – ''देवलोकं गत्वा इन्द्रं युद्धवार्ताम् उक्त्वा आगच्छतु'' इति । सः दूतः स्वर्गं गत्वा महिषासुरस्य वचनं श्रावितवान् ।

एतत् श्रुत्वा क्रुद्धः इन्द्रः दिक्पालकान् आहूय उक्तवान् – ''रम्भपुत्राय महिषासुराय ब्रह्मणा वरः दत्तः । एतस्मात् मत्तः सः देवलोकं वशीकर्तुं सन्नाहं कृतवान् अस्ति । उद्धत-वचनानि तस्य मुखात् निर्गच्छन्ति इदानीम् । इन्द्रपदवीम् एव वशीकरिष्यामि इति वदन् कञ्चित् दूतं प्रेषितवान् अस्ति सः । 'मम सेवकत्वम् इष्यते भवता उत युद्धम् इति सूचयतु' इति दूतद्वारा वार्तां प्रेषितवान् अस्ति सः । एतादृशे अवसरे किं करणीयम् इति भवन्तः एव निर्णयन्तु । एतादृशान् दुष्टान् न निगृह्णीमः चेत् लोके अराजकता उत्पद्येत । अतः युद्धं करणीयम् एव भवेत् । युद्धारम्भात् पूर्वम् अस्माभिः शत्रोः सामर्थ्यम् अवगन्तव्यम् । एतदर्थं कस्यचित् जनस्य प्रेषणं वरम्'' इति ।

इन्द्रेण प्रेषितः दूतः महिषासुरस्य बलस्य पूर्णं विवरणम् आनीतवान् । एतत् ज्ञात्वा इन्द्रः नितराम् आश्चर्यचकितः । सः स्वस्य पुरोहितं बृहस्पत्याचार्यम् आहूय उक्तवान् – ''महिषासुरः महत्या सेनया सह युद्धं कर्तुम् आगच्छन् अस्ति । एतत् आक्रमणम् अवरोद्धुं किं कोऽपि उपायः अस्ति ?'' इति ।

इन्द्रस्य भीतिं दृष्ट्वा बृहस्पतिः अवदत् - ''कापि विपत्तिः उपस्थिता चेत् धैर्यच्युतिः न भवेत् । धैर्य ध्रियताम् । यत् भवितव्यं तत् भवेत् एव । तथापि प्रयत्नः कदापि न परित्यक्तव्यः । दैवशक्तौ विश्वासमात्रेण किमपि कार्यं न सिद्ध्यति'' इति ।

तदा इन्द्रः अवदत् - ''प्रयत्नः न परित्यक्तव्यः इत्येतत् अहम् अङ्गीकरोमि । राजानः सर्वदा शत्रुसंहारम् इच्छन्ति एव । किन्तु तदर्थम् उपायः कः इत्येव मम स्पष्टता नास्ति । अतः इदानीं किं करणीयम् इति भवान् एव मार्गम् उपदिशतु'' इति ।

''युद्धस्य करणम् अकरणं वा भवतः अधीनम् । अतः युद्धं करोतु इति, न करोतु इति वा अहं न वदामि । यत् युक्तं भासते तदनुगुणं करोतु'' इति अवदत् बृहस्पतिः ।

ततः इन्द्रः ब्रह्माणं शरणं गत्वा अवदत् - ''महिषासुरः नाम मदोन्मत्तः राक्षसः महत्या सेनया सह स्वर्गस्य आक्रमणार्थम् आगच्छन् अस्ति । तस्य सेना अपारा । इदानीं किं करणीयम् इति न ज्ञायते'' इति ।

तदा ब्रह्मा अवदत् - ''शिवेन विष्णुना च सह समालोच्य तयोः साहाय्यं स्वीकृत्य एव युद्धकरणं वरं स्यात् । अतः आदौ कैलासं गच्छाम'' इति ।

ततः तौ कैलासं गत्वा शिवं समग्रं वृत्तान्तं श्रावितवन्तौ । तदनन्तरं त्रयः अपि सम्भूय विष्णुसमीपं गतवन्तः । सम्यक् समालोच्य ते निर्णीतवन्तः यत् महिषासुरस्य सम्मुखीकरणम् एव उत्तमः मार्गः इति । ब्रह्मा, शिवः, विष्णुः च युद्धार्थं सन्नद्धाः जाताः । तैः सह

कुमारस्वामी, इन्द्रः चापि आगतौ । देवसेना अपि राक्षससेनां सम्मुखीकर्तुं सन्नद्धा जाता ।

ततः देवदानवयोः घोरं युद्धं प्रवृत्तम् । दिक्पालकाः, इन्द्रः, त्रिमूर्तयः च स्वस्य शौर्यपराक्रमादिकं प्रदर्शितवन्तः । तथापि महिषासुरस्य पुरतः ते हतप्रभाः जाताः । अन्ते तैः प्राणरक्षणार्थं रणरङ्गात् पलायनं करणीयम् अभवत् । तेषां पराजयतः स्वर्गः महिषासुराधीनः जातः । महिषासुरः इन्द्रासने उपविश्य अन्येषु आसनेषु राक्षसान् उपवेशितवान् । देवकोषं स्वाधीनीकृत्य निरातङ्कं सुखम् अनुभवन् शासनम् अनुवर्तितवान् ।

एतत् कष्टं सोढुं देवाः न शक्तवन्तः । ब्रह्मणः आस्थानम् आगत्य ते उक्तवन्तः - ''महिषासुरः स्वर्गम् एव विजित्य अस्मान् कष्टगर्ते पातितवान् अस्ति । अस्माकम्



एतस्याः दुरवस्थायाः विषये किमर्थम् अवधानं न दीयते भवता ? अग्रे अस्माकं का गतिः स्यात् इति भवता एव वक्तव्यम्'' इति ।

''मया अपि किं वा कर्तुं शक्येत ? कोऽपि पुरुषः तं मारयितुं न शक्नोति । तादृशं वरं प्राप्तवान् अस्ति सः । कापि स्त्री एव तं संहर्तुम् अर्हति । अतः एतद्विषये वयं विष्णुना शिवेन च सह चर्चां करवाम, आगच्छन्तु'' इति उक्तवान् ब्रह्मा ।

ततः ते सर्वे शिवसमीपं गतवन्तः । ''केन उद्देशेन आगतं भवद्भिः ?'' इति पृष्टवान् शिवः ।

''भवता अविदितं किं वा अस्ति ? महिषासुरेण स्वर्गः स्वाधीनीकृतः अस्ति । इन्द्रादयः अन्ये देवाः च तेन निरन्तरं पीड्यन्ते । अतः एतद्विषये भवतः साहाय्यम् इच्छामः वयम्'' इति अवदत् ब्रह्मा ।

तदा शिवः मन्दहासपूर्वकम् अवदत् - ''देवानाम् एतस्याः दुरवस्थायाः मूलकारणं भवान् एव खलु ? भवतः वरस्य कारणतः एव कोऽपि पुरुषः तं संहर्तुं न शक्नोति । इदानीं भवान् एव वदतु - तस्य संहारार्थं कां प्रेषयेम इति । किं भवान् स्वपत्नीं प्रेषयेत् ? अथवा किं मया मम पत्नी प्रेषणीया ? उताहो इन्द्रस्य पत्नी किम् एतत् कार्यं साधयेत् ? एतासु काऽपि युद्धविद्यायां निपुणा न । अतः रणरङ्गं प्रति तासां प्रेषणतः न किमपि प्रयोजनं भवेत् । विष्णुः एव कमपि मार्गं सूचयितुं समर्थः'' इति ।

ततः सर्वे विष्णोः समीपं गतवन्तः । तेषाम् आगमनकारणं पृष्ट्वा विष्णुः उक्तवान् - ''वयं सर्वे राक्षसेन पराजिताः स्मः । तं जेतुं काचित् स्त्री एव समर्था खलु ? अतः वयं सर्वे स्वस्य तेजसः आधारेण काञ्चित् स्त्रियं सृजाम ।

वयं सर्वे तस्यै स्वस्य अस्त्राणि यच्छाम । सा महिषासुरस्य संहारं करोतु'' इति ।

विष्णोः कथनस्य समनन्तरम् एव तेषां मध्ये किञ्चन तेजः उत्पन्नम् । अष्टादश-हस्तयुक्ता काचित् स्त्री प्रत्यक्षा जाता । देवाः स्वस्य आयुधानि तस्याः हस्ते स्थापितवन्तः । तदा सा देवी देवान् उद्दिश्य - ''देवाः ! अलं भीत्या । तं राक्षसम् अहं मारयिष्यामि'' इति वदन्ती सिंहनादं कृतवती ।

महिषासुरः एतं नादं श्रुत्वा - ''कः सः सिंहः इव गर्जति ? तं गृहीत्वा मम पुरतः उपस्थापयन्तु । मत्तः पराजयं प्राप्तवतां देवानां मध्ये कस्यचित् अपि एतावत् धैर्यं भवितुं न अर्हति'' इति अवदत् ।

महिषासुरस्य आज्ञायाः अनुसारं केचन सैनिकाः देवीं ग्रहीतुम् आगताः । महादेव्याः अवतारं दृष्ट्वा ते भयेन कम्पमानाः जाताः । ते धावन्तः प्रतिगत्य महिषासुरम् उक्तवन्तः - ''काचित् स्त्री सिंहम् आरुह्य तिष्ठति । अष्टादश हस्ताः सन्ति तस्याः'' इति ।

तदा महिषासुरः मन्त्रिणम् अवदत् - ''तर्हि तां गृहीत्वा आनयतु । अहं तां राजमहिषीं करिष्यामि'' इति ।

मन्त्री महादेव्याः समीपं गत्वा भीत्या अपृच्छत् - ''अम्ब ! भवती का ? किमर्थं अत्र आगतं भवत्या ? समस्तलोकस्य शासकः महिषासुरः भवतीं परिणेतुम् इच्छति'' इति ।

एतत् श्रुत्वा देवी मन्दहासं प्रकटयन्ती उक्तवती - ''अहं भवतः राजानम् एव संहर्तुम् आगता अस्मि । तस्य पक्षं समर्थयतः भवत अपि संहारः स्यादेव । मम आगमनस्य उद्देशं स्वामिनः पुरतः स्पष्टीकरोतु'' इति ।

मन्त्री महादेव्याः वचनं महिषासुरं यथावत् निवेदितवान् । एतस्मिन् वचने महिषासुरस्य विश्वासः न जातः । सः युद्धार्थं सेनापतिं प्रेषितवान् । सः महादेव्या हतः जातः । महिषासुरः अन्यान् सेनापतीन् प्रेषितवान् । ते अपि हताः अभवन् । अन्ते महिषासुरः स्वयं गतवान् । तयोः घोरं युद्धं प्रवृत्तम् । देवी कामरूपिणी आसीत् । अतः अनेकानि रूपाणि धरन्ती सा युद्धं कृतवती । अन्ते सा चक्रायुधेन तस्य शिरः कर्तितवती । एतत् दृष्ट्वा सन्तुष्टाः देवाः देव्याः स्तोत्रं कृतवन्तः ।

नित्यसन्तोषी

भीमः रामः च प्रतिवेशिनौ । रामः सर्वदा सन्तोषेण तिष्ठति स्म । किन्तु भीमः सर्वदा दुःखी एव भवति स्म ।

रामस्य चतुरेकर्मिता समृद्धा भूमिः आसीत् । अतः भीमः चिन्तितवान् यत् रामस्य सन्तोषस्य कारणं भूसम्पत्तिः एव इति । तदर्थं सः पञ्च-एकर्मितां भूमिं क्रीतवान् । तथापि रामस्य यावान् सन्तोषः तावान् न भवति स्म तस्य । 'रामस्य एतादृशस्य सन्तोषस्य मूलकारणं किं स्यात् ? मया किमर्थं तादृशः सन्तोषः न प्राप्यते' इति चिन्तयति स्म सः ।

रामस्य विवाहः जातः । तस्य पत्नी नितरां सुन्दरी । चन्द्रलेखा इव शोभते स्म सा । अतः भीमः चिन्तितवान् यत् सुन्दरी पत्नी अपि रामस्य सन्तोषस्य कारणं स्यात् इति । अतः सः अपि विवाहे मतिं कृतवान् । रामस्य पत्न्याः यावत् सौन्दर्यं ततोऽपि अधिकं सौन्दर्यं स्यात् मम पत्न्याः इति अचिन्तयत् भीमः । अतः सः सर्वत्र अन्विष्य रामपत्नीतोऽपि सुन्दरीं कन्यां परिणीतवान् । तथापि तेन रामस्य आनन्दात् अधिकः आनन्दः न प्राप्तः ।

रामः अट्टद्वयात्मकं भवनं निर्मापितवान् । तदा भीमः त्र्यट्टात्मकं भवनं निर्मापितवान् । रामः दशभ्यः जनेभ्यः भोजनं ददाति स्म । अतः भीमः विंशतिजनेभ्यः भोजनदानम् आरब्धवान् । एवं सर्वेषु अंशेषु रामम् अतिशेतुं प्रयत्नं करोति स्म भीमः । तथापि सन्तोषः यदा तोल्यते तदा रामस्य सन्तोषस्य एव भारः अधिकतया दृश्यते स्म ।

भीमः सर्वदा रामस्य सर्वान् व्यवहारान् सूक्ष्मेक्षिकया पश्यति स्म । रामः यत् करोति स्म तदेव कार्यं भीमः द्विगुणितप्रमाणेन करोति स्म । तथापि भीमस्य सन्तोषस्य परिमाणे वृद्धिः न जाता ।

एतादृश्यां स्थितौ कश्चन संन्यासी तं ग्रामम् आगतवान् । रामः तं स्वगृहं प्रति निमन्त्र्य भक्त्या श्रद्धया च तदीयं सत्कारं कृतवान् ।

तस्य आदरसत्कारादिना सन्तुष्टः संन्यासी

तम् उक्तवान् - "वत्स ! भवान् यत् इच्छति तत् याचतु" इति ।

तदा रामः विनयेन उक्तवान् - "मम पत्नी सद्गुणसम्पन्ना । मम पुत्राः अपि उत्तमस्वभाव- युक्ताः । एतावता अहं सन्तुष्टः अस्मि । यथाशक्ति परोपकारम् अपि अहं कुर्वन् भवामि । इदानीं यत् सौभाग्यम् अस्ति तेनैव वयं सर्वे तृप्ताः । एषा एव स्थितिः सदा भवतु इति आशीर्वादं करोतु कृपया" इति ।

"भवतः सन्तुप्तिः श्लाघनीया । अतः भगवतः कृपादृष्टिः भवन्तं सदा रक्षिष्यति" इति वदन् आशीर्वादं कृतवान् सः संन्यासी ।

एतदनन्तरं भीमस्य निमन्त्रणं प्राप्य सः भीमगृहं गतवान् । महता आदरेण भीमोऽपि संन्यासिनः सत्कारं कृतवान् । अयं सत्कारः रामस्य सत्कारं निश्चयेन अतिशेते स्म । अतः सन्तुष्टः संन्यासी भीमम् अपि उक्तवान् - "भवान् यत् इच्छति तत् याचतु" इति ।

"मम प्रतिवेशी रामः मां कस्मिंश्चित् अपि अंशे अतिशेतुं यथा न शक्नुयात् तथा वरेण अनुगृह्णातु" इति प्रार्थितवान् भीमः ।

एतत् श्रुत्वा आश्चर्यं प्रकटयन् संन्यासी उक्तवान् - "स्वस्य निमित्तं यत् आवश्यकं तत् एव याचनीयम् । अन्यस्य भाग्यस्य विषये असूया न उचिता । अन्यस्य अभिवृद्धेः स्थगनार्थं प्रयासः सर्वथा अनुचितः" इति ।

तदा भीमः उक्तवान् - "रामम् अतिशेतुं शक्तः भवामि चेदेव मम आनन्दः । मम आनन्दः यथा वर्धेत तथा आशीर्वादः करणीयः भवता । अन्यथा मया मम दौर्भाग्यं

निन्दनीयम्'' इति ।

संन्यासी क्षणकालं नेत्रे निमील्य स्थितवान् । ततः सः नेत्रे उद्घाट्य भीमम् उक्तवान् - ''भवतः इच्छाम् अहं पूरयिष्यामि । किन्तु एतदर्थं रामस्य अनुज्ञा आवश्यकी भवति'' इति ।

तदा भीमः खेदेन उक्तवान् - ''भवान् वरं दातुं न इच्छति चेत् वरं मा ददातु । रामः अनुज्ञां दद्यात् इति भ्रमः मास्तु भवतः'' इति ।

''अये मूर्ख ! रामः यदि अनुज्ञां दद्यात् तर्हि भवतः एव सन्तोषस्य वृद्धिः भविष्यति । सः यदि अनुज्ञां न दद्यात् तर्हि अपि सः भवत्तः अधमः एव भविष्यति । रामः आवयोः वार्तालापं न जानाति । अत्र उभयथा अपि भवतः एव लाभः । अतः रामम् अत्र आनाययतु'' इति सूचितवान् संन्यासी ।

रामम् आनायितवान् भीमः । भीमस्य गृहम् आगतः रामः भीमस्य अपेक्षां ज्ञात्वा विना प्रतिवचनम् अनुज्ञां दत्तवान् एव ।

तदा संन्यासी आश्चर्यं प्रकटयन् - ''अन्यः अतिशयितव्यः इति सर्वेषाम् अपि इच्छा भवति एव । भीमः भवन्तं यथा अतिशयीत तथा अनुज्ञा दत्ता अस्ति भवता । किम् एतत् ज्ञात्वा कृतं भवता ? एवम् अनुज्ञां यच्छतः भवतः आशयः कः ?'' इति ।

तदा रामः उक्तवान् - ''महात्मन् ! भवान् तु पूज्यः । भवतः पुरतः गोपनेन किम् ? प्रतिवेशिनः यदि अस्मत्तः न्यूनाः भवन्ति तर्हि ईर्ष्यासूयादिकं प्राप्य अस्मान् आधिक्येन पीडयन्ति । अस्माकं मनः खेदयन्ति अपि । यदि ते अस्मत्तः श्रेष्ठाः स्युः तर्हि ते अस्मान् विस्मरेयुः । अथवा अस्मान् दयापात्रं भावयित्वा ते अस्माकं साहाय्यं कुर्युः । यदि वयं स्वसन्तोषमात्रं पश्यामः तर्हि अहं स्वार्थी अस्मि इति भावः अस्मान् पीडयेत् । अन्येषां प्रगतिं ये इच्छन्ति ते सदा सन्तोषं प्राप्तुम् अर्हन्ति । अतः अन्यः मत्तः अधिकं सन्तोषं प्राप्नोति चेत् मम आनन्दः एव । परसन्तोषात् ये सन्तुष्यन्ति ते एव नित्यसन्तोषिणः'' इति ।

एतत् श्रुत्वा भीमः अवगतवान् यत् रामस्य सन्तोषस्य रहस्यं किम् इति । अतः तस्मात् दिनात् सः परसन्तोषणम् एव स्वसन्तोषं भावयितुम् उद्युक्तः अभवत् । तस्मात् सोऽपि अचिरात् एव नित्यसन्तोषी जातः ।

उत्तमस्वप्नद्रष्टा

विनायकः पाकनिपुणः । तस्य मातापितरौ, बान्धवाः, परिवारः वा न आसन् । अतः यत्र पाककार्यं लभ्यते तत्र गच्छति स्म सः । एवम् एव कानिचन वर्षाणि गतानि । 'इतः परं एकत्र स्थातुं प्रयासः करणीयः' इति सः चिन्तितवान् । अतः उद्योगदातुः धनिकस्य अन्वेषणम् आरब्धवान् सः ।

रघुवीरः कश्चन कृपणः । सः अविवाहितः । 'यदि विवाहितः स्यां तर्हि पत्नीपुत्रादीनां पोषणार्थं व्ययः करणीयः भवेत्, सम्पत्तिः च पुत्राणाम् अधीना भवेत्' इति चिन्तनं तस्य ।

यदा वार्धक्यं प्राप्तं तदा सः चिन्तितवान् – 'कश्चन पाचकः गृहे पाककार्यार्थं नियोक्तव्यः' इति । परिवाररहितम् एव पाचकम् इच्छति स्म सः । परिवाररहितः विनायकः यदा आगत्य उद्योगं पृष्टवान् तदा रघुवीरः सन्तुष्टः । एवं रघुवीरगृहे विनायकः पाचकत्वेन नियुक्तः जातः । प्रतिदिनं रघुवीरः सामान्यम् एव आहारं सेवते स्म । 'उत्तमः पाकः कार्येत चेत् तदेव पाचकः अपि खादेत्' इति आतङ्कः तस्य । पाचकस्य उत्तमाहारसेवनं न सहते स्म सः ।

* * *

दीपावलीदिने ग्रामे सर्वेषु गृहेषु उत्साहेन उत्सवः आचर्यते स्म । ग्रामजनाः गृहम् अलङ्कृत्य नूतनवस्त्राणि धृत्वा मधुरपाकं सज्जीकुर्वन्ति स्म । विनायकः अपि दीपावलीदिने बहुविधखाद्यानि सज्जीकृतवान् उत्साहेन । एतदर्थं सः स्वामिनः अनुमतिं न प्राप्तवान् आसीत् । 'दीपावली तु विशेषोत्सवः । अतः विशेषपाकः स्वामिना अनुमन्यते एव' इति तस्य चिन्तनम् आसीत् ।

रघुवीरः भोजनार्थम् आगतः । विविधखाद्यानि दृष्ट्वा सः आश्चर्यचकितः । ''किम् एतत् विनायक ? सप्ताहार्थं यावत् आवश्यकं तावत् अद्यैव किं सज्जीकृतं भवता ?'' इति अपृच्छत् सः ।

''अद्य दीपावली । वर्षे एकस्मिन् दिने वा भूरिभोजनं भवान् सेवेत इति मया एषः पाकः सज्जीकृतः'' इति उक्तवान् विनायकः ।

''एवम् ! अस्तु तावत्'' इति उक्त्वा मौनम् आश्रितवान् रघुवीरः । 'यदि कृतं कार्यम्

अनुचितं इति वदेयं तर्हि अयं कुपितः सन् इतः निर्गच्छेत्' इति भीतिः तस्य ।

'पाकार्थं धनं तु व्ययितम् एव । अतः अद्य आतृप्ति विविधखाद्यानि खादिष्यामि' इति निर्णीतवान् सः ।

'एतादृशः उत्तमः पाकः पाचकेन विनायकेन न खादनीयम्' इति चिन्तनं रघुवीरस्य । अतः सज्जीकृतानि सर्वाणि खाद्यानि एकैकशः स्वयम् एव खादितुम् उद्युक्तः अभवत् सः । पाकस्य भूयान् भागः यदा खादितः तदा तदीयम् उदरं धान्यागाराकारतां गतम् । तथापि खादितवान् सः यावच्छक्ति । महान् प्रयत्नः कृतः चेदपि कुण्डलिकाः तेन खादितुं न शक्ताः एव । किन्तु ताः विनायकाय दातुं न इच्छति स्म सः । 'विनायकः एतानि यथा न खादेत् तथा कोऽपि उपायः करणीयः' इति सः अचिन्तयत् ।



''कुण्डलिकाः रुचिकर्यः सन्ति । ताः सायं खादिष्यामि अहम् । एताः सर्वाः पार्श्वे स्थापयतु'' इति विनायकम् अवदत् रघुवीरः । स्वामिना यथा आदिष्टं तथैव कृतवान् विनायकः ।

रात्रिः जाता । किन्तु रघुवीरः अल्पाम् अपि बुभुक्षां न प्राप्तवान् एव । तथापि 'ताः कुण्डलिकाः मया एव खादनीयाः' इति तस्य सङ्कल्पः । अतः सः विनायकम् आहूय अवदत् - ''भोः विनायक ! आवयोः मध्ये काचित् स्पर्धा कुतो न भवेत् ? तेन उत्सवाचरणम् आनन्दमयं स्यात् । आवाम् उभौ अपि शयनं करवाव । उत्तमं स्वप्नं द्रष्टुं प्रयत्नं च करवाव । यस्य स्वप्नः अत्युत्तमः भवति सः एताः कुण्डलिकाः खादतु । एतत् अनुमन्यते खलु भवता ?'' इति ।

विरोधवचनं वक्तुम् अशक्नुवन् विनायकः अवदत् - ''अस्तु । तथैव भवतु'' इति ।

रघुवीरः सन्तोषेण शयनार्थं गतवान् । 'श्वः प्रातः मम बुभुक्षा स्यादेव । तदा एताः कुण्डलिकाः सर्वाः अहम् एव खादिष्यामि । मम स्वप्नः एव अत्युत्तमः इति निर्णयम् अहम् एव श्रावयिष्यामि । मम निर्णयं विरोद्धुं पाचकस्य तस्य सामर्थ्यं कथं भविष्यति ?' इति अचिन्तयत् सः ।

रघुवीरः यदा गाढनिद्रामग्नः जातः तदा विनायकस्य उदरे महती बुभुक्षा उद्बुद्धा । सः विना शब्दम् उत्थाय पाकशालां गत्वा कुण्डलिकापात्रस्य आवरणम् अपनीतवान् । कुण्डलिकाः तस्य खादनेच्छाम् उद्दीपितवत्यः । अन्यच्च प्रातःकालतः तेन किमपि खादितं न आसीत् अपि । अतः सर्वाः कुण्डलिकाः खादित्वा उद्गिरणं कृतवान् सः । ततः पुनरपि विना शब्दं गत्वा सः शय्यायां सुप्तवान् ।

अनन्तरदिने प्रातः उत्थितः रघुवीरः विनायकम् आहूतवान् । ''ह्यः रात्रौ कीदृशः स्वप्नः दृष्टः भवता ?'' इति पृष्टवान् च ।

''मया तु ह्यः रात्रौ रोमाञ्चकारी स्वप्नः दृष्टः'' इति विनयेन उक्तवान् विनायकः ।

''मया कीदृशः स्वप्नः दृष्टः इति ज्ञातुं कुतूहली स्यात् खलु भवान् ? मया तु अपूर्वः स्वप्नः दृष्टः । स्वप्ने मया काचित् राजकुमारी परिणीता । अहं तस्याः राज्यस्य राजा अभवम् । मम पट्टाभिषेकस्य अनन्तरं राजकुमारी अहं

चसिंहासने उपविष्टवन्तौ । आस्थानिकाः मन्त्रिप्रभृतयः च आवां परितः स्थिताः आसन् । सुन्दर्यः नर्तक्यः समग्रं दिनं यावत् नृत्यं प्रदर्शितवत्यः । निपुणाः वाद्यवादकाः विविधानि वाद्यानि वादयन्ति स्म । एवम् एकं दिनं कथं गतम् इत्येव न ज्ञातं मया । तदस्तु, भवतः स्वप्नः कीदृशः आसीत् ?'' इति पृष्टवान् रघुवीरः ।

तदा विनायकः अवदत् - ''यदा अहं निद्रां प्राप्तवान् तदा मम स्वप्ने माता दुर्गा गर्जन्ती प्रत्यक्षा अभवत् । 'दीपावलीदिने प्रातःकालतः सायङ्कालपर्यन्तम् उपवासम् आचरतः भवतः कियत् धैर्यम् ? गच्छतु पाकशालाम् । तत्रत्याः कुण्डलिकाः खादतु । अन्यथा मारयिष्यामि भवन्तम्' इति क्रोधेन आदिष्टवाती सा । अहं भीतः । तथापि तां विनयेन अवदम् - 'अम्ब ! ताः अहं खादितुं न शक्नोमि । यः उत्तमस्वप्नं पश्यति सः एव ताः खादितुम् अर्हति इति मया मम स्वामिना च अङ्गीकृतम् । कृपया अनुरोधं मा करोतु । स्वामिने दत्तं वचनं भञ्जयितुम् अहं न इच्छामि' इति । 'मास्तु प्रतिवचनम् । साक्षात् पाकशालां गत्वा कुण्डलिकाः खादतु । अन्यथा अहं संहरिष्यामि भवन्तम्' इति आदिष्टवती सा । दीपावलीदिने अहं मरणं प्राप्तुं न इच्छामि स्म । अतः कुण्डलिकाः खादिताः मया'' इति ।

''कीदृशः मूर्खः भवान् ! किमर्थम् अहं न जागरितः भवता ? पार्श्वप्रकोष्ठे एव अहम् आसम् । उच्चैः आहूतं चेदपि अहम् आगच्छेयम् । तदा भीत्या भवता कुण्डलिकाः खादिताः न अभविष्यन् । किमर्थम् एतत् न कृतं भवता ?'' इति क्रोधेन पृष्टवान् रघुवीरः ।

''मया भवतः आह्वानार्थं प्रयत्नः कृतः एव । किन्तु भवान् राजास्थाने राजकुमार्या सह सिंहासने उपविष्टः आसीत् । भवन्तं परितः आस्थानिकाः बहवः आसन् । नाट्यकाराः वाद्यकाराः चापि आसन् । एवं स्थिते कथम् अहं भवत्समीपम् आगन्तुं शक्नुयाम् ? तथापि मया कश्चन प्रयत्नः कृतः । किन्तु द्वारपालकाः मां बलात् निवारितवन्तः । अतः मया भवत्समीपम् आगन्तुं सर्वथा न शक्तम्'' इति असहायकताप्रदर्शनपुरस्सरम् उक्तवान् विनायकः ।

रघुवीरः निर्वचनः जातः । स्वस्य कृत्यर्थं सः लज्जितः जातः । तस्य कृत्यस्य असमीचीनताम् उपायेन स्मारितवान् आसीत् विनायकः । विनायकसदृशम् उत्तमं पाचकं त्यक्तुं सर्वथा न इच्छति स्म रघुवीरः ।

ततः आरभ्य रघुवीरः उत्तमं भोजनं सज्जीकारयन् तत् खादितुं विनायकाय अपि अवकाशं ददाति स्म ।

चन्दमामाप्रस्तुतिः
अजेयः गरुडः
10
चित्रं - पाणिः
पितुः आज्ञायाः अनुगुणम् आदित्यः गरुडमूर्तेः पूजां करोति स्म । कदाचित् आसमये कश्चन पिञ्छः बृहदाकारतां प्राप्य आकाशे उड्डीय गतः । आदित्यस्य शरीरे कानिचन परिवर्तनानि दृष्टानि । अशरीरवाणी असूचयत् यत् भवता भगवतः आशीर्वादः प्राप्तः अस्ति, जनाः च अपरिवर्तितरूपेण एव भवन्तं द्रक्ष्यन्ति इति । बहवः गरुडवेषधारिणः राज्ये दृष्टाः । जनस्थाने प्रवर्तमानं शूलारोपणं द्रष्टुं जनाः सम्मिलिताः । सेनापतिः तत्पुत्रः च एतत् शूलारोपणं निवारयितुं ... कृतवन्तौ । तदनन्तरम् ...
किं भवता आदित्यस्य बन्धनं कृतम् ?
यदि मम योजना सफला भवेत् तर्हि चन्द्रपुर्याः भाग्यं परिवर्तितं स्यात् ।
प्रधानमन्त्री तदीये निवासस्थाने नास्ति ।
यत् शिरच्छेदनं निश्चितम् आसीत् तत् व्याक्षिप्तम् अस्माभिः ।
शीघ्रं प्रासादस्य सुरक्षाभटान् परिवर्तयन्तु राजा च ग्रहीतव्यः ।
... ततः राजा रहस्यस्थले स्थापनीयः । तदनन्तरं राज्ये घोषणीयं यत् राजा गरुडेन अपहृतः अस्ति इति ।
अस्तु सेनापतिवर्य ।

यदि गरुडः अस्माभिः गृहीतः भवेत् तर्हि...
रवीन्द्र ! अचिरात् एव तेन सह युद्धम् आरब्धं भविष्यति ।
कश्चन अधिकारी नरेन्द्रदेवम् उक्तवान् यत् राज्ञः प्रकोष्ठे एकं पत्रम् आसीत् इति ।
किम् एतत् पत्रम् ? केन एतत् स्थापितं स्यात् ।
अहं राज्ञः शत्रुः न, अपि तु मित्रम् । राजा मुख्यमन्त्री च मया स्वाधीनी-कृतौ ।....
... एतेन क्रमेण तौ रक्ष्येते मया ! इतः परं युद्धं भविष्यति सच्छक्ति-दुष्टशक्त्योः ।
भोः शत्रवः, सावधानाः भवन्तु ! - गरुडः
गरुडः ! गरुडः !! भवन्तः इतः गत्वा राज्ञः मन्त्रिणः च अन्वेषणं कुर्वन्तु । तौ मारयन्तु अपि । एषा मम आज्ञा इति अन्यान् अपि वदन्तु ।
यदि गरुडस्य उपस्थितिः सूच्यते तर्हि पारितोषिकम् ! मयापि सावधानेन भाव्यम् ।
जनस्थाने घोषितं यत् राजा प्रधानमन्त्री च अदृश्यतां गतौ इत्यतः रवीन्द्रदेवः कार्यनिर्वहणाधिकारित्वेन नियुक्तः अस्ति इति ।

राज्ञः परिवारः पर्वतमार्गेण गच्छन् आसीत् ।
महाराज ! ते सर्वे सेनापतिपक्षीयाः आसन् ।
ते गरुडः इव मुखावरणं धृत्वा अटन्तः सन्ति ।
... जनान् पीडयन्ति ते ।
...सर्वान् मारयन्ति ते ।
... गृहाणि ज्वालयन्ति ते ।
...सर्वविधान् अत्याचारान् अपि कुर्वन्तः सन्ति ते ।

मया ज्ञातं यत् नरेन्द्रदेवः राजभक्तान् सुरक्षाभटान् अपनीय तत्र स्वपक्षीयान् नियोज्य भवन्तम् अपहर्तुं योजनां कृतवान् आसीत् इति ।
यदा अपायसम्भावना मया ज्ञाता तदा भवान् अत्र आनीतः । रथस्य चालकः अस्ति रामसिंहः । मया भवान् कुत्र नीतः इति राजभवने कोऽपि न जानाति ।
एषा गुहा अपाय-रहितं स्थलम् ।
आदित्य ! भवान् मया सह स्थास्यति खलु ?
मया राजधानीं गत्वा तत्रत्या स्थितिः परिशीलनीया । रामसिंहः भवतः रक्षणदायित्वं निर्वक्ष्यति । भोः रामसिंह !
रामसिंहः तत्र उपस्थितः
अरुणः अत्रैव अस्ति आ बहोः कालात् ।
वयं महाराजेन मिलाम तावत् ।
महाराज ! एषः रामसिंहः । अरुणा मम पितुः सकाशात् आयुर्वेदं पठति स्म । एषा भवता सह स्थास्यति ।
वेषं परिवर्त्य आदित्यः राजधानीं गच्छति ।
अस्माकं मुख्यमन्त्री अत्युत्तमः आसीत् । दौर्भाग्यवशात् सः अदृश्यतां गतः ।
अहो, एते योग्येन क्रमेण दण्डनीयाः ।
अनुवर्तते

चित्रशीर्षिकास्पर्धा

उपरितनं चित्रद्वयं दृष्ट्वा परस्परसम्बन्धिवाक्यद्वयेन चित्रशीर्षिकां किं भवन्तः प्रेषयितुं शक्नुयुः ?

समपत्रे लिखिता चित्रशीर्षिका अधस्तनसङ्केताय प्रेषणीया -

चन्दमामा (संस्कृतम्) 'अक्षरम्' ८ उपमार्गः, गिरिनगरम्, बेङ्गलूरु - ५६००८५

युक्ता शीर्षिका एतन्मासस्य २५ तः पूर्वं प्रेषणीया । सर्वश्रेष्ठायै शीर्षिकायै रू. १००/- पुरस्काररूपेण दास्यन्ते ।

पुरस्कृता शीर्षिका मासद्वयानन्तरं प्रकाशयिष्यते ।

अभिनन्दनानि

'नवम्बर्'मासीयस्पर्धाशीर्षिकाप्रेषकः -
सनत्कुमार उपाध्यायः
शङ्कराचार्यसंस्कृतविद्यालयः
द्वारका. जि.जामनगर - ३६१ ३३५

पुरस्कृतशीर्षिका



प्राप्तेऽपि क्रीडनके किमर्थम् उदासीनता ?
निलीयते खलु, किम् आगता माता ?

चन्दमामायाः वार्षिकं ग्राहकशुल्कं -

भारते रू. १२० - ००

Payment in favour of CHANDAMAMA INDIA LIMITED
No. 82, Defence Officers Colony, Ekkatuthangal, Chennai - 600 097

Printed and Published by B. Viswanatha Reddi at B.N.K. Press Pvt. Ltd., Chennai - 600 026 on behalf of Chandamama India Limited, No. 82, Defence Officers Colony, Ekkatuthangal, Chennai - 600 097. Editor : Viswam

Looking for a Birthday Gift?



What else than good old Chandamama!

CHANDAMAMA

An ideal growth scheme for the Indian child

Gift an annual subscription of Chandamama, India's oldest and best-loved children's magazine.

Available in 12 languages.

For subscription details, please see facing page.

CHANDAMAMA (Sanskrit) JANUARY 2002
Regd. with RNI. No. 42664/85
Registered No. TN/Chief PMG-867/2001